CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तोत्र रत्नावली



संकलक

फूलचन्द अग्रवाला

CC-0. Mumukshu Bhawan Varanasi Collection. Di...

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तोत्र रत्नावली

(षष्ठम् संस्करण)

फूलचन्द अग्रवाला

पिताश्री

श्री लायक राम अग्रवाला

सुपुत्र

चि० श्री सत्येन्द्र कूमार अग्रवाला

चि० श्री राजेन्द्र कूमार अग्रवाला

पौत्र

चि० शशांक कूमार

चि० रोहिताश्व कूमार

चि० ऋतध्वज कूमार

लायक भवन

पटना (बिहार)

स्पीडक्राफ्ट्स प्राईवेट लि० — पटना

फूलटास टैम्पर प्रा० लि० — पटना

फूलटास ट्रान्समोटिव्स प्रा० लि० — पटना

फूलचन्द सन्स एण्ड कं० — पटना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री मुद्रण, पटना-4 द्वारा फोटोटाइपसेट एवं मुद्रित ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्री गणेशाय नमः ॥

ॐ श्री

ॐ पूर्णमदः पूर्णःमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ नमः शम्भवाय च मयोभवाय च
नमः शङ्कराय च मयस्कराय च
नमः शिवाय च शिवतराय च

रुद्र नर, उमा नारी, तस्मैः तस्मैः नमोः नमः
रुद्र ब्रह्मा, उमा वाणी, तस्मैः तस्मैः नमोः नमः
रुद्र विष्णु, उमा लक्ष्मी तस्मैः तस्मैः नमोः नमः
रुद्र सूर्य, उमा छाया तस्मैः तस्मैः नमोः नमः
रुद्र दिवा, उमा रात्री तस्मैः तस्मैः नमोः नमः
रुद्र शोम, उमा तारा तस्मैः तस्मैः नमोः नमः
रुद्र नर, उमा नारी तस्मैः तस्मैः नमोः नमः

ॐ नमः शिवायः शुभं शुभं कुरु कुरु शिवायः नमः ॐ

सर्व विघ्न विनाशाय सर्व कल्याण हेतवे
पार्वती प्रिय पूत्राय गणेशाय नमोः नमः

वक्रतुण्ड महाकाय सूर्य कोटि समप्रभः
निर्विघ्नं कुरुमेदेव सर्व कार्येषु सर्वदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शान्ताकारम् भुजगशयनम् पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्॥

लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्।
वन्दे विष्णुं भवभय हरं सर्व लोकैकनाथम्॥

मङ्गलं भगवान् विष्णु मङ्गलं गरुडध्वजः।
मङ्गलं पुण्डरीकाक्षः मङ्गलाय तनो हरिः॥

सर्व मङ्गल माङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते॥

कुंकुम सज्जलं दिव्यं सुख सौभाग्यं वर्द्धनम्।
मोहिनी च महालक्ष्मी सुयश प्रदायकम्॥

कर्पूर-गौरं करुणावतारं, संसार-सारं भुजगेन्द्र-हारम्।
सदावसन्तं हृदयारविन्दे, भवं भवानी सहितं नमामि॥

नीलाम्बुज श्यामल कोमलाङ्गं सीता समारोपितवाम भागम्।
पाणौ महासायक चारु चापं नमामि रामं रघुवंश नाथम्॥

वसुदेव सुतं देवं कंस चाणूरमर्दनम्।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम्॥

हे राम! पुरुषोत्तम! नरहरे नारायण! केशव!।
गोविंद! गरुडध्वज! गुणनिधे दामोदर! माधव!।
हे कृष्ण! कमलापते यदुपते सीतापते श्रीपते।
वैकुण्ठाधिपते चराचरपते लक्ष्मीपते पाहिमाम्॥

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिकमालिकां च दधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥

गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परंब्रह्म, तस्मै श्री गुरवे नमः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव॥

वन्दे देवमुमापतिं सुरगुरु वन्दे जगत्कारणं,
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्यशशांकवह्निनयनं वन्दे मुकुन्द प्रियं,
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम्॥

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर
दिवाकर नमस्तुभ्यं प्रभाकर नमोस्तुते

नमः श्री विश्वकर्माय कान्तिमान् रचनात्मकम्।
सुन्दरं सौरभ उत्पादन हो यश कीर्ति प्रदायकम्॥

या देवि सर्व भूतेषु मातृ रूपेण संस्थिता
नमस्तस्यैः नमस्तस्यैः नमस्तस्यैः नमोनमः

गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥

जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥

जगत्पूज्ये जगद्-वन्द्ये सर्व-शक्ति-स्वरूपिणि।
सर्वात्मिकेशि ! कौमारि ! जगन्मातर्नमोऽस्तुते॥

पापाप् हारी दुरी तारी तरंग धारी,
शैल प्रचारी, गिरीराज गुहा विदारी,
झंकार कारी, हरि पादर जोप हारी,
गागं पुनाति सततं शुभ कारी वारी।

प्रसीद देवाधिदेव महादेव,
प्रसीद देव महेश्वर।
प्रचुर ऐश्वर्यवान, प्रचंड शक्तिशाली,
कुरु मम भारत देश
त्वमेव देव चराचरस्य।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुन्दरीं स्वर्ण-सर्वाङ्गीं सुख-सौभाग्यं-दायिनीम्।
फूलजननीं देवी सुभद्रां प्रणमाम्यहम्॥

ब्रह्मा मुरारि त्रिपुरान्तकारी, भानु शशि भौम सुतो बुधश्च।
गुरुश्च शुक्रः शनि राहु केतवः सर्वे ग्रहा शान्ति करा भवन्तु॥

पिता स्वर्गः पिता धर्मः पिता ही परमन्तपः
पितरी प्रितिमापन्ने प्रियन्ते सर्व देवताः

☆

संकष्टनाशनगणेशस्तोत्रम्

गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामी विघ्नेश्वरपादपंकजम्॥
प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्तावांस स्मरेन्नित्यमायुःकामार्थसिद्धये॥ १॥
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम्॥ २॥
लम्बोदरं पञ्चमं च षष्ठं विकटमेव च1
सप्तमं विघ्नराजं च धूम्रवर्णं तथाऽष्टमम्॥ ३॥
नवमं भालचन्द्रं च दशमं तु विनायकम्।
एकादशं गणपतिं द्वादशं तु गजाननम्॥ ४॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभोः॥ ५॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम्।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम्॥ ६॥
जपेद् गणपतिस्स्तोत्रं षड्भिर्मासैः फलं लभेत्।
संवत्सरेण सिद्धिं च लभते नात्र संशयः॥ ७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टाभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत्।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥ ८ ॥
श्री नारदपुराणे संकष्टनाशनं गणेशस्तोत्रं संपूर्णम्।

☆

श्रीगणपति-वन्दन

खर्वं स्थूलतनुं गजेन्द्र वदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्ध लुब्धमधुपब्यालोलगण्डस्थलम्।
दन्ताघातविदारितारिरुधिरैः सिन्दूर शोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥

भगवान ब्रह्मा, विष्णु, महेश

जय शिव ओंकारा, भज शिव ओंकारा।
ब्रह्मा विष्णु सदाशिव अर्द्धंगी धारा ॥ १ ॥ ॐ हर हर हर महादेव

एकानन चतुरानन पञ्चानन राजै।
हंसासन गरुड़ासन वृषवाहन साजै ॥ २ ॥ ॐ हर हर हर महादेव

दो भुज चारु चतुर्भुज दशभुज अति सोहै।
तीनों रूप निरखते त्रिभुवन-जन मोहै ॥ ३ ॥ ॐ हर हर हर महादेव

अक्षमाला वनमाला रुण्डमाला धारी।
त्रिपुरारी कंसारी करमाला धारी ॥ ४ ॥ ॐ हर हर हर महादेव

श्वेताम्बर पीताम्बर बाघम्बर अंगे।
सनकादिक गरुडादिक भूतादिक संगे ॥ ५ ॥ ॐ हर हर हर महादेव

कर मध्ये सुकमण्डलु चक्र-शूलधारी।
सुखकारी दुखहारी जग-पालनकारी ॥ ६ ॥ ॐ हर हर हर महादेव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मा विष्णु सदाशिव जानत अविवेका।
प्रणवाक्षर में शोभित ये तीनों एका ॥ ७ ॥ ॐ हर हर हर महादेव
त्रिगुणस्वामि की आरती जो कोई नर गावै।
भणत शिवानंद स्वामी सुख संपति पावै ॥ ८ ॥ ॐ हर हर हर महादेव

☆

वेदसारशिवस्तोत्रम्

पशूनां पतिं पापनाशं परेशं गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं महादेवमेकं स्मरामि स्मरारिम् ॥ १ ॥
महेशं सुरेशं सुरारार्तिनाशं विभुं विश्वनाथं विभूत्यङ्गभूषम्।
विरूपाक्षमिन्द्वर्क-वह्निं त्रिनेत्रं सदानन्दमीडे प्रभु पञ्चवक्त्रम् ॥ २ ॥
गिरीशं गणेशं गले नीलवर्णं गवेन्द्राधिरूढं गुणातीतरूपम्।
भवं भास्वरं भष्मना भूषिताङ्गं भवानीकलत्रं भजे पञ्चवक्त्रम् ॥ ३ ॥
शिवाकान्त शम्भोशशाङ्कार्धमौले महेशान् शूलिन् जटाजूटधारिन्।
त्वमेको जगद्-व्यापको विश्वरूप प्रसीद प्रसीद प्रभो पूर्णरूप ॥ ४ ॥
परात्मानमेकं जगद्-बीजमाद्यं निरीहं निराकारमोङ्कारवेद्यम्।
यतो जायते पाल्यते येन विश्वं तमीशं भजे लीयते यत्र विश्वम् ॥ ५ ॥
न भूमिर्न चापो न वह्निर्न वायुर्न चाकाशमास्ते न तन्द्रा न निद्रा।
न ग्रीष्मो न शीतं न देशो न वेषो न यस्याऽस्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥
अजं शास्वतं कारणं कारणानां शिवं केवलं भासकं भासकानाम्।
तुरीयं तमःपारमाद्यन्तहीनं प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७ ॥
नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते चिदानन्दमूर्ते।
नमस्ते नमस्ते तपोयोगगम्यं नमस्ते नमस्ते श्रुतिज्ञानगम्यं ॥ ८ ॥
प्रभो शूलपाणे विभो विश्वनाथं महादेव शम्भो महेशत्रिनेत्रम्।
शिवाकान्त शान्त स्मरारे पुरारे त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥
शम्भो महेशं करुणामय शूलपाणे गौरीपते पशुपाशनाशिन्।
काशीपते करुणामया जगदेतदेकस्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥ १० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वत्तो जगद् भवति देव भव स्मरारे त्वय्येव तिष्ठति जगन्मृड विश्वनाथ।
त्वय्येव गच्छति लय भजदेतदीशलिङ्गात्मकं हर चराऽचरविश्वरूपिन्॥ ११ ॥

☆

शिवाऽष्टोत्तरशतनामस्तोत्रम्

जय शम्भो विभो रुद्र स्वयम्भो जय शङ्कर !।
जयेश्वर जयेशान जय जय सर्वज्ञ कामद !॥ १ ॥
नीलकण्ठ जय श्रीद श्रीकण्ठे जय धूर्जटे !।
अष्टमूर्तेऽनन्तमूर्ते महामूर्ते जयानघ !॥ २ ॥
जय पापहरानङ्ग-निःसङ्गभङ्ग-नाशन !।
जय त्वं त्रिदशाधार त्रिलोकेश त्रिलोचन !॥ ३ ॥
जय त्वं त्रिपथाधार त्रिमार्ग त्रिभिरुजित !।
त्रिपुरारे त्रिधामूर्ते जयैक-त्रिजटात्मक !॥ ४ ॥
शशिशेखर शूलेश पशुपाल शिवाप्रिय !।
शिवात्मक शिव श्रीद सुहृच्छीशतनो जय !॥ ५ ॥
सर्व सर्वेश भूतेश गिरीश त्वं गिरीश्वर !।
जयोग्ररूप भीमेश भव भर्ग जय प्रभो॥ ६ ॥
जय दक्षाऽध्वर-ध्वंसिन्नन्धक-ध्वंसकारक !।
रुण्डमालिन् कपालिस्त्वं भुजङ्गाजिनभूषण !॥ ७ ॥
दिगम्बर दिशानाथ व्योमकेश चितांपते !।
जयाधार निराधार भस्माधार धराधर !॥ ८ ॥
देवदेव महादेव देवतेशादिदैवत।
वह्निवीर्य जय स्थाणो जयायोनिजसम्भव॥ ९ ॥
भव शर्व महाकाल भस्माङ्ग सर्पभूषण।
त्र्यम्बक स्थपते वाचांपते भो जगतांपते॥ १० ॥
शिपिविष्ट विरूपाक्ष जय लिङ्ग वृषध्वज।
नीललोहित पिङ्गाक्ष जय खट्वाङ्गमण्डन॥ ११ ॥
कृत्तिवास अहिर्बुध्न्य मृडानीश जटाम्बुभृत्।
जगद्भ्रातर्जगन्मातर्जगत्तात जगद्गुरो॥ १२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चवक्त्र महावक्त्र कालवक्त्र गजास्यभृत् ।
दशबाहो महाबाहो महावीर्य महाबल ॥ १३ ॥
अघोरघोरवक्त्र त्वं सद्योजात उमापते ।
सदानन्द महानन्द नन्दमूर्ते जयेश्वर ॥ १४ ॥
एवमष्टोत्तरशतं नाम्नां देवकृतं तु ये ।
शम्भोर्भक्त्या स्मरन्तीह श्रृण्वन्ति च पठन्ति च ॥ १५ ॥
न तापस्त्रिविधास्तेषां न शोको न रुजादयः ।
ग्रहगोचरपीडा च तेषां क्वाऽपि न विद्यते ॥ १६ ॥
श्रीः प्रज्ञा-ऽऽरोग्यमायुष्यं सौभाग्यं भाग्यमुन्नतिम् ।
विद्या धर्मे मतिः शम्भोर्भक्तिस्तेषां न संशयः ॥ १७ ॥

☆

शिवाऽष्टोत्तरशतनामस्तोत्रम्

शिवो महेश्वरः शम्भुः पिनाकी शशिशेखरः ।
बामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १ ॥
शङ्करः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ।
शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥ २ ॥
भवः शर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः ।
उग्रः कपाली कामारिरन्धकासुरसूदनः ॥ ३ ॥
गङ्गाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४ ॥
कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।
वृषाङ्की वृषभारूढो भस्मोद्धूलितविग्रह ॥ ५ ॥
सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञ परमात्मा च सोम-सूर्याऽग्नि-लोचनः ॥ ६ ॥
हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिव ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥ ७ ॥
हिरण्यरेता दुर्धर्षो गिरीशो गिरिशोऽनघः ।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृत्तिवासाः पुरारातिर्भगवान् प्रमथाधिपः।
मृत्युञ्जयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥ ९ ॥
व्योमकेशो महासेन-जनकश्चारुविक्रमः।
रुद्रो भूतपतिः स्थाणुरहिर्बुधन्यो दिगम्बरः ॥ १० ॥
अष्टमूर्तिरनेकात्मा सात्त्विकः शुद्धविग्रह।
शाश्वतः खण्डपरशू रजः पाशविमोचनः ॥ ११ ॥
मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरी हरः ॥ १२ ॥
भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात्।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ॥ १३ ॥

☆

शिवस्तोत्रम्

विश्वेश्वराय नरकार्णवतारणाय
कर्णामृताय शशिशेखरधारणाय।
कर्पूरकान्तिधवलाय जटाधराय
सुख सम्पद् वृद्धि करणाय नमः शिवाय ॥ १ ॥
गौरिप्रियाय रजनीशकला धराय
कालान्तकाय भुजगाधिपकङ्कणाय।
गङ्गाधराय गजराज-विमर्दनाय सुख
समृद्धि वृद्धि करणायः नमः शिवाय ॥ २ ॥
भक्तिप्रियाय भय-रोग-भयापहाय
उग्राय दुर्गभव-सागरतारणाय।
ज्योतिर्मयाय गुणनामसुनृत्यकाय सन्तती
सुख वृद्धि करणायः नमः शिवाय ॥ ३ ॥
चर्माम्बराय भस्मविलेपनाय भाले-
क्षणाय मणिकुण्डलमण्डिताय।
मञ्जीरपादयुगलाय जटाधराय
मंगलः कारी देवः शिवाय ॥ ४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चाननाय　　　फणिराजविभूषणाय
　　हेमांशुकाय　　　भुवनत्रयमण्डिताय ।
आनन्दभूमिवरदाय　तमोमयाय　विद्या
　　बुद्धी वृद्धि करणायः नमः शिवाय ।। ५ ।।
भानुप्रियाय　　　भवसागरतारणाय
　　कालान्तकाय　　　कमलासनपूजिताय ।
नेत्रत्रयाय शुभलक्षणलक्षिताय उद्योगे
　　व्यापारे वृद्धि करणायः नमः शिवाय ।। ६ ।।
रामप्रियाय　　　रघुनाथवरप्रदाय
　　नागप्रियाय　　　नरकार्णवतारणाय ।
पुण्येषु पुण्यभरिताय सुरार्चिताय धन
　　सम्पति वृद्धि करणायः नमः शिवाय ।। ७ ।।
मुक्तेश्वराय　फलदाय　गणेश्वराय
　　गीतप्रियाय　　　वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय पुष्टि-तुष्टि
　　वृद्धि　कारणाय　नमः　शिवाय ।। ८ ।।
　　फूलेन कृतं स्तोत्रं सर्वरोगनिवारणम् ।
　　सर्वसम्पत्करं शीघ्रं पुत्र-पौत्रादि-वर्धनम् ।
　त्रिसन्ध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात् ।। ९ ।।

☆

शिवमहिम्नस्तोत्रम्

पुष्पदन्त उवाच

महिम्नः　पारं　ते　परम　विदुषो　यद्यसदृशी
　　स्तुतिर्ब्रह्मादीनामपि　तदवसन्नास्त्वयि　गिरः ।
अथाऽवाच्यः सर्वः स्वमति-परिणामावधि गृणन्
　　ममाऽप्येषः स्तोत्रे हर ! निरपवादः परिकरः ।। १ ।।
अतीतः पन्थानं तव च महिमा वाङ्-मनसयो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्म स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २ ॥
मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मान्! किं वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन! बुद्धिर्व्यवसिता ॥ ३ ॥
तवैश्वचर्थ्यं यत्तज्जगदुदरक्षा-प्रलयकृत्
त्रयीवस्तु-व्यस्तं तिसृषु गुणभिन्नासु तनुषु।
अभव्यानामस्मिन् वरद! रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडगधियः ॥ ४ ॥
किमीहः किं कायः स खुलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं काश्चिन् मुखरयति मोहाय जगतः ॥ ५ ॥
अजन्मानो लोकाः किमवयवन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर! संशेरत इमे ॥ ६ ॥
त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजु-कुटिल-नानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥
महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद! तन्त्रोपकरणम्।
सुरास्तां तामृद्धिं दधति तू भवद्भ्रू प्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८ ॥
ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याऽध्रौव्ये जगति गदति व्यस्तविषये।
समस्तेऽप्येतस्मिन् पुरमथन! तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तवैश्वर्यं यत्नाद्यदुपरि विरञ्चिर्हरिरधः
परिच्छेत्तुं यातावनलमनिनलस्कन्धवपुषः।
ततो भक्ति-श्रद्धा-भरगुरु-गृणद्भ्यां गिरीश! यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति॥ १०॥
अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्।
शिरः पद्मश्रेणी-रचित-चरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर! विस्फूर्जितमिदम्॥ ११॥
अमुष्य त्वत्सेवा-समधिगत-सारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः।
अलभ्या पातालेऽप्यलस-जलिताङ्गुष्ठ-शिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः॥ १२॥
यदृद्धिं सुत्राम्णो वरद! परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजन-विधेयस्त्रिभुवनः।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-
र्न कस्याऽप्युन्नत्यै भवति सिरसस्त्वय्यवनतिः॥ १३॥
अकाण्ड-ब्रह्माण्ड-क्षय-चकित-देवासुरकृपा-
विधेयस्याऽऽसीद् यस्त्रिनयनविषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभय-भङ्ग-व्यसनिनः॥ १४॥
असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश! त्वामितर-सुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः॥ १५॥
मही पादाघाताद् ब्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद् भुजपरिघ-रुग्ण-ग्रहगणम्।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृत-जटा-ताडित-तटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥ १६॥
वियद्व्यापी तारागण-गुणित फेनोद्गम-रुचिः
प्रवाहो वारां यां पृषतलघुदृष्टः शिरसि ते।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्यनेनैवोन्नेयं धृतमहिम ! दिव्यं तव वपुः ॥ १७ ॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चंद्राऽर्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८ ॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निज-मुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर ! जागर्ति जगताम् ॥ १९ ॥

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमताम्
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा कृतपरिकरः कर्मसु जनः ॥ २० ॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृताम्
ऋषीणामार्त्त्विज्यं शरणद ! सदस्याः सुरगणाः ।
क्रतुभ्रेषस्त्वत्तः क्रतुफल-विधान-व्यसनिनो
ध्रुवं कर्तुः श्रद्धा-विधुरमभिचाराय हि मखाः ॥ २१ ॥

प्रजानाथं नाथ ! प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२ ॥

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन ! पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरत-देहार्धघटना-
दवैति त्वामद्धावत वरद ! मुग्धा युवतयः ॥ २३ ॥

स्मशानेष्वाक्रीडा स्मरहर ! पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथाऽपि स्मर्तॄणां वरद ! परमं मङ्गलमसि ॥ २४ ॥

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान्॥ २५॥
त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्त्वं वयमिह तु यत्त्वं न भवसि॥ २६॥
त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद! गृणात्योमिति पदम्॥ २७॥
भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायाऽस्मै धाम्ने प्रविहित-नमस्योऽस्मि भवते॥ २८॥
नमो नेदिष्ठाय प्रियदव! दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर! महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन! यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः॥ २९॥
बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः॥ ३०॥
कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद! चरणयोस्ते वाक्यपुष्पोपहारम्॥ ३१॥
असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश! पारं न याति॥ ३२॥
असुर-सुर-मुनीन्द्रैरर्चितस्येन्दुमौले-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्रंथित-गुण-महिम्नो निर्गुणस्येश्वरस्य ।
सकलगुणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ।। ३३ ।।
अहरहरनद्यं धुर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च ।। ३४ ।।
महेशान्नाऽपरो देवो महिम्नो नाऽपरा स्तुतिः ।
अघोरान्नाऽपरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ।। ३५ ।।
दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तव पाठस्य कलां नाऽर्हन्ति षोडशीम् ।। ३६ ।।
कुसुमदशननामा सर्वगन्धर्वराजः
शशिधर-वरमौलेर्देवदेवस्य दासः ।
सगुरु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः ।। ३७ ।।
सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नाऽन्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ।। ३८ ।।
[आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्व-भाषितम् ।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ।।
तव तत्त्वं न जानामि कीदृशोऽपि महेश्वर ।
यादृशोऽसि महादेव ! तादृशाय नमो नमः ।।
एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ।।]
श्री पुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्विषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ।। ३९ ।।
इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ।। ४० ।।

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवताण्डवस्तोत्रम्

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्यलम्बितां भुजङ्गतुङ्गमालिकाम् ।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ।। १ ।।
जटाकटाह-सम्भ्रमभ्रमन्निलिम्प-निर्झरी-
विलोलविवीचि-वल्लरी-विराजमानमूर्धनि ।
धगद्-धगद्-धगज्ज्वलल् -ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ।। २ ।।
धराधरेन्द्रनन्दिनी- विलासबन्धुबन्धुर-
स्फुरद् दिगन्तसन्तति-प्रमोदमान-मानसे ।
कृपाकटाक्ष-धोरणी- निरुद्धदुर्धरापदि
कूचिदिगाम्बरे मनो विनोदमेतु वस्तुनि ।। ३ ।।
जटाभूजङ्गपिङ्गल- स्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रव-प्रलिप्त-दिग्वधूमुखे ।
मदान्ध-सिन्धुरस्फुरत- त्वगुत्तरीयमेदुरे
मनोविनोदमद्भुतं बिभर्तु भूतभर्तरि ।। ४ ।।
सहस्रलोचन- प्रभृत्यशेष- लेखशेखर-
प्रसूनधूलिधोरणी- विधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियैचिराय जायतां चकोरबन्धुशेखरः ।। ५ ।।
ललाट-चत्वरज्वलद् धनञ्जय-स्फुलिङ्गभा-
निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।
सुधामयूखलेखया विराजमानशेखरं
महाकपालि सम्पदे शिरो जटालमस्तु नः ।। ६ ।।
कराल भालपट्टिका- धगद्धगद्धगज्जवलद्-
घनञ्जयाधरीकृत- प्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनी -कूचाग्र- चित्रपत्रक-
प्रकल्पनैक-शिल्पिनि त्रिलोचने मतिर्मम ।। ७ ।।
नवीनमेघ-मण्डली निरुद्धदुर्धरस्फुरत्-
कुहूनिशीथिनीतमः प्रबन्धबन्धुकन्धरः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निलिम्प-निर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥ ८ ॥
प्रफुल्लनील पङ्कज-प्रपञ्चकालिमच्छटा-प्रभा
बिडम्बिकण्ठकन्दली रुचिप्रबन्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिद मखच्छिदं
गजच्छिदा ऽन्धकच्छिदं तमन्तकच्छिदं भजे ॥ ९ ॥
अखर्व-सर्वमङ्गला- कलाकदम्बमञ्जरी-
रसप्रवाहमाधुरी-विजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तका-ऽन्धकान्तकं तमन्तकान्तकं भजे ॥ १० ॥
जयत्वदभ्र-विभ्रम-भ्रमद्भुजङ्गमस्वस
धगद्धगद्विनिर्गमत्-कराल-भालहव्यवाट् ।
धिमिद्धिमिद्धिमि-ध्वनन् मृदङ्गतुङ्-गमङ्गल-
ध्वनिक्रमप्रवर्तित-प्रचण्डताण्डवः शिवः ॥ ११ ॥
(दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्त्रजो-
र्गरिष्ठरत्नलोष्ठयोः सुहृद्-विपक्ष-पक्षयोः ।
तृणारविंदचक्षुषोः प्रजामहीमहेंद्रयोः
समं प्रवृत्तिकः मनः कदा सदाशिवं भजे ॥ १२ ॥
कदा निलिम्पनिर्झरी-निकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन् ।
विलोललोललोचना- ललाम-भाल-लग्नकः
शिवेति मंत्रमुच्चरन् कदा सुखी भवाम्यहम् ॥ १३ ॥
इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन् स्मरन् ब्रुवन्नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ स भक्तिमाशु-याति नाऽन्यथा गतिं,
विमोहनं हि देहिनां सु शङ्करस्य चिन्तनम् ॥ १४ ॥
पूजाऽवसानसमये दशवक्त्रगीतं
यः शम्भूपूजनमिंद पठति प्रदोषे ।
तस्य स्थिरां रथ-गजेन्द्र-तुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥ १५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवभुजङ्गप्रयातं स्तोत्रम्

गलद्दानगण्डं मिलद्भृङ्गखण्डं चलच्चारुशुण्डं जगत्त्राणशौण्डम्।
लसद्दन्तकाण्डं विपद्भङ्गचण्डं शिवप्रेमपिण्डं भजे वक्त्रतुण्डम्॥ १॥
अनाद्यन्तमाद्यं परं तत्वमर्थं चिदाकारमेकं तुरीयं त्वमेवम्।
हरिर्ब्रह्ममृग्यं परब्रह्मरूप मनोवागतीतं महः शैवमीडे॥ २॥
स्वशक्त्यादि-शक्त्यन्तसिंहासनस्थं मनोहारि-सर्वाङ्ग-रत्नादिभूषम्।
जटाहीन्दुगङ्गास्थिशश्यर्कमौलिं परं शक्तिमित्रं नुमः पञ्चवक्त्रम्॥ ३॥
शिवेशान-तत्पुरुषाघोरवामादिभि-र्ब्रह्मभि र्हन्मुखैः षड्भिरङ्गैः।
अनौपम्यषट्त्रिंशतं तत्त्वविद्यामतीतं परं त्वां कथं वेत्ति को वा॥ ४॥
प्रवाल-प्रवाह-प्रभाशोणधर्मं मरुत्वन्मणि-श्रीमहःश्याममधर्मम्।
गुणस्यूतमेकं वपुश्चैकमन्तः स्मरामि स्मरापत्ति-सम्पत्तिहेतुम्॥ ५॥
स्वसेवा-समायात-देवासुरेन्द्र-नमन्मौलि-मन्दार-मालाभिषिक्तम्।
नमस्यामि शम्भो पदाम्भोरुहं ते भवाम्भोधिपोतं भवानीविभाव्यम्॥ ६॥
जगन्नाथ मन्नाथ गौरीसनाथ प्रपन्नाऽनुकम्पिन् विपन्नार्तिहारिन्।
महः स्तोममूर्ते समस्तैकबन्धो नमस्ते नमस्ते पुनस्ते नमोऽस्तु॥७॥
महादेव देवेश देवादिदेव स्मरारे पुरारे यमारे हरेति।
ब्रुवाणः स्मरिष्यामि भक्त्या भवन्तं ततो मे दयाशील देव प्रसीद॥ ८॥
विरूपाक्ष विश्वेश विद्यादिकेश त्रयीमूल शम्भो शिव त्र्यम्बक त्वम्।
प्रसीद स्मर त्राहि पश्यावपुष्य क्षमस्वाऽऽप्नुहीति क्षपा हि क्षिपामः॥ ९॥
त्वदन्यः शरण्यः प्रपन्नस्य नेति प्रसीद स्मरन्नेव हन्तास्तु दैन्यम्।
न चेत्ते भवेद् भक्तवात्सल्यहानिस्ततो मे दयालो दयां सन्निधेहि॥ १०॥
अयं दानकालस्त्वहं दानपात्रं भवन्नाथ दाता त्वदन्यं न याचे।
भवद्भक्तिमेव स्थिरां देहि मह्यं कृपाशील शंभोकृतार्थोऽस्मि तस्मात्॥ ११॥
पशुं वेत्सि चेन्मां त्वमेवाऽधिरूढः कलङ्कीति वा मूर्ध्नि धत्से त्वमेव।
द्विजिह्वः पुनः सोऽपि ते कण्ठभूषात्वङ्गीकृताः शर्व सर्वेऽपिधन्याः॥ १२॥
न शक्नोमि कर्तुं परद्रोहलेशं कथं प्रीयसे त्वं न जाने गिरीश।
तदा हि प्रसन्नोऽसि कस्याऽपि कान्ता सुतद्रोहिणो वा पितृद्रोहिणो वा॥ १३॥
स्तुतिं ध्यानमर्चां यथा वद् विधातुं भजन्नजानन् महेशावलम्बे।
त्रसन्तं सुतं त्रातुमग्रे मृकण्डोर्यमप्राणनिर्वापणं त्वत्पदाब्जम्॥ १४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अकंठे कलङ्कादनङ्गे भुजङ्गादपाणौ कपालादभालेऽनलाक्षात्।
अमौलौ शशाङ्कादवामे कलत्रादहं देवमन्यं न मन्ये न मन्ये॥ १५॥

☆

शिवपञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय॥ १॥
मन्दाकिनी-सलिल-चन्दन-चर्चिताय नन्दीश्वर-प्रमथनाथ-महेश्वराय।
मन्दारपुष्प-बहुपुष्प-सूपूजिताय तस्मै मकाराय नमः शिवाय॥ २॥
शिवाय गौरीबदनाब्जवृन्द-सूर्याय दक्षाऽध्वर-नाशकाय।
श्रीनिलकण्ठाय वृषभध्वजाय तस्मै शिकाराय नमः शिवाय॥ ३॥
वसिष्ठ कुम्भोद्भव-गौतमार्य-मुनीन्द्र-देवाऽर्चित शेखराय।
चन्द्रार्क-वैश्वानर-लोचनाय तस्मै वाकाराय नमः शिवाय॥ ४॥
यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय।
दिव्याय देवाय दिगम्बराय तस्मै यकाराय नमः शिवाय॥ ५॥
पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥ ६॥

☆

शिवषडक्षरस्तोत्रम्

ऊँकारं विन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः।
कामदं मोक्षदं चैव ॐ काराय नमो नमः॥ १॥
नमन्ति ॠषयो देवा नमन्त्यप्सरसां गणाः।
नरा नमन्ति देवेशं नकाराय नमो नमः॥ २॥
महादेवं महात्मानं महाध्यानं परायणम्।
महापापहरं देव मकाराय नमो नमः॥ ३॥
शिव शान्तं जगन्नाथं लोकानुग्रहकारकम्।
शिवमेकपदं नित्यं शिकाराय नमो नमः॥ ४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम् ।
वामे शक्तिधरं देवं वा काराय नमो नमः ॥ ५ ॥
यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः ।
यो गुरुः सर्वदेवानां यकाराय नमो नमः ॥ ६ ॥
षडक्षरमिदं स्तोत्रं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ७ ॥

☆

शिवस्तोत्रम्

जय शङ्कर पार्वतीपते मृड शम्भो शशिखण्डमण्डन ।
मदनान्तक भक्तवत्सल प्रियकैलास दयासुधाम्बुधे ॥ १ ॥
सुदपाय-कथास्वपण्डितो हृदये दुःखशरेण खण्डितः ।
शशिखण्ड-शिखण्ड मण्डनं शरणं यामि शरण्यमीश्वरम् ॥ २ ॥
महतः परितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे ।
दिननाथ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि नः ॥ ३ ॥
न वयं तव चर्मचक्षुषा पदवीमप्युपवीक्षितुं क्षमाः ।
कृपयाऽभयदेन चक्षुषा सकलेनेश विलोकयाशु नः ॥ 4 ॥
स्वदनुस्मृतिरेव पावनी स्तुतियुक्ता न हि वक्तुमीशसा ।
मधुरं हि पयः स्वभावतो ननु कीदृक् सित-शर्करान्वितम् ॥ ५ ॥
सविषोऽप्यमृतिरेव पावनी स्तुतियुक्ता न हि वक्तुमीशसा ।
मधुरं हि पयः स्वभावतो ननु कीदृक् सित-शर्करान्वितम् ॥ ५ ॥
सविषोऽप्यमृतायते भवाञ्छवमुंडाभरणोऽपि पावनः ।
भव एव भवान्तकः सतां समदृष्टिर्विषमेक्षणोऽपि सन् ॥ ६ ॥
अपि शूलधरो निरामयो दृढवैराग्यरतोऽपि रागवान् ।
अपि भैक्ष्यचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो ॥ ७ ॥
वितरत्यभिवाञ्छित दृशा परिदृष्टः किल कल्पपादपः ।
हृदये स्मृत एव धीमते नमतेऽभीष्टफलप्रदो भवान् ॥ ८ ॥
सहसैव भुजङ्गपाशवान् विनिगृह्णाति न यावदन्तकः ।
अभयं कुरु तावदाशु मे गतजीवस्य पुनः किमौषधैः ॥ ९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुदिषैरिव भोगपत्रगैर्विषयैरेभिरलं परिक्षतम्।
अमृतैरिव सम्भ्रमेण मामभिषिञ्चाशु दयावलोकनैः ॥ १० ॥
मुनयो बहवोऽद्य धन्यतां गमिताः स्वाभिमतार्थदर्शिनः।
करुणाकर येन तेन मामवसन्नं ननु पश्य चक्षुषा ॥ ११ ॥
प्रणमाम्यथ यामि चाऽपरं शरणं कं कृपणाभयप्रदम्।
विरहीव विभो प्रियामयं परिपश्यामि भवन्मयं जगत् ॥ १२ ॥
बहवो भवताऽनुकम्पिताः किमितीशान न माऽनुकम्पसे।
दधता किमु मन्दराचलं परमाणुः कमठेन दुर्धरः ॥ १३ ॥
अशुचिं यदि माऽनुमन्यसे किमिदं मूर्ध्नि कपालदाम ते।
उत शाठ्यमसाधुसङ्गिनं विषलक्ष्मासि न किं द्विजह्वधृक् ॥ १४ ॥
क्व दृशं विदधामि किं करोम्यनुतिष्ठामि कथं भयाकुलः।
क्व नु तिष्ठसि रक्ष रक्ष मां मयि शम्भो शरणागतोऽस्मि ते ॥ १५ ॥
विलुठाभ्यवनौ किमाकुलः किमुरो हन्मि शिरश्छिनद्मि वा।
किमु रोदिमि रारटीमि किं कृपणं मां न यदीक्षसे प्रभो ॥ १६ ॥
शिव सर्वग्य शर्व शर्मदं प्रणतो देव दयां कुरुष्व मे।
नम ईश्वर नाथ दिक्पते पुनरेवेश नमो नमोऽस्तु ते ॥ १७ ॥
शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका।
शरणं पुनरेव तावुभौ शरणं नाऽन्यदुपैमि दैवतम् ॥१८ ॥
उपमन्युकृतं स्तवोत्तमं जपतः शम्भुसमीपवर्तिनः।
अभिवाञ्छितभाग्यसम्पदः परमायुः प्रददाति शङ्करः ॥ १९ ॥
उपमन्युकृतं स्तवोत्तमं प्रजपेद्यस्तु शिवस्य सन्निधौ।
शिवलोकमवाप्य सोऽचिरात् सह तेनैव शिवेन मोदते ॥ २० ॥

☆

श्री विश्वनाथमङ्गलस्तोत्रम्

गङ्गाधरं शशिकिशोरधरं त्रिलोकी
रक्षाधरं निटिल-चंद्रधर त्रिधारम्।
भस्मावधूलनधरं गिरिराजकन्या
दिव्यावलोकनधरं वरदं प्रपद्ये ॥ १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काशीश्वरं सकल-भक्त - जनार्त्तिहारं
विश्वेश्वरं प्रणतपालन-भव्यभारम् ।
रामेश्वरं विजयदान-विधानधीर
गौरीश्वरं वरदहस्तधरं नमामः ॥ २ ॥
गङ्गोत्तमाङ्गकलितं ललितं विशालं
तं मङ्गलं गरलनीलगल ललामम् ।
श्रीसर्पमाल्य-वलयोज्ज्वल-मञ्जुलीलं
लक्ष्मीश्वरार्चित-पदाम्बुजमाभजामः ॥ ३ ॥
दारिद्र्य-दुःखदहनं कमनं सुराणां
दीनार्त्ति-दावदहनं दमनं रिपूणाम् ।
दानं श्रियां प्रणमनं भुवनाधिपानां
मान् सतां वृषभवाहनमामनामः ॥ ४ ॥
श्रीफूलचन्द्रशरणं रमणं भवान्याः
शश्वत्प्रपन्नभरणं धरणं धरायाः ।
संसार-भार-हरणं करुणं वरेण्यं
सन्ताप-तापहरणं शरण्यम् ॥ ५ ॥
चण्डी-पिचण्डिल - वितुण्ड-धृताभिषकं
श्रीकार्तिकेय-कलनृत्यकलावलोकम् ।
नन्दीश्वरस्य-वरवाद्य-महोत्सवाढ्यं
सोल्लास-हास-गिरिजं गिरिशन्तमीडे ॥ ६ ॥
श्रीमोहिनी-निबिड-रागभरोपगूढं
योगेश्वरेश्वर-हृदम्बुज-वासरासम् ।
सम्मोहनं गिरिसूताञ्चित-चन्द्रचूडम्
श्रीविश्वनाथमधिनाथमुपैमि नित्यम् ॥ ७ ॥
आपद् विनश्यति समृध्यति सर्वसम्पद्
विघ्नाः प्रयान्ति विलयं शुभमभ्युदेति ।
योग्याङ्गनाप्तिरतुलोत्तमपुत्रलाभो
विश्वेश्वरस्तवमिमं पठतो जनस्य ॥ ८ ॥
वन्दी विमुक्तिमधिगच्छति तूर्णमेति
स्वास्थ्यं रुजार्दित उपैति गृहं प्रवासी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्या यशो विजय इष्ट-समस्त-लाभः
सम्पद्यतेऽस्य पठनात् स्तवनस्य सर्वम् ॥ ९ ॥
कन्या वरं सुलभते पद पाठनाद् मनुस्य
स्तोत्रस्य धान्य-धनवृद्धि-सुखं समिच्छन्।
किं च प्रसीदति विभुः परमो दयालुः
श्रीविश्वनाथ इह संभजतोऽस्य साम्ब ॥ १० ॥
काशीपीठाधिनाथेन शङ्कराचार्यभिक्षुणा।
महेश्वरेण ग्रथिता स्तोत्र-माला शिवार्पिता ॥ ११ ॥

☆

शिवनामावाल्यष्टकम्

हे चद्रचूडण मदनान्तक शूलपाणे
स्थाणो गिरीश गिरिजेश महेश शम्भो।
भूतेश भीतभयसूदन मामनाथं
मंगलकारी देव नमः शिवायः ॥ १ ॥
हे पार्वती-हृदय वल्लभ चद्रमौले
भूताधिप प्रमथनाथ गिरीशजाप।
हे वामदेव भव रुद्र पिनाकपाणे
मंगलकारी देव नमः शिवायः ॥ २ ॥
हे नीलकण्ठ वृषभध्वज पञ्चवक्त्र
लोकेश शेषवलयं प्रमथेश शर्व।
हे धूर्जटे पशुपते गिरिजापते मां
विद्या बुद्धि दाता नमः शिवाय ॥ ३ ॥
हे विश्वनाथ शिव शङ्कर देवदेव
गङ्गाधर प्रमथनायक नन्दिकेश।
बाणेश्वरान्धिकरिपो हर लोकनाथ
विद्या बुद्धि दाता नमः शिवायः ॥ ४ ॥
वाराणसीपुरपते मणिकर्णिकेश
बीरेश दक्षमखकाल विभो गणेश।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वज्ञ सर्वहृदयैकनिवास नाथ
सुख सम्पति दाता नमः शिवायः ॥ 5 ॥
श्रीमन् महेश्वर कृपामय हे दयालो
हे व्योमकेश शितिकण्ठ गणाधिनाथ।
भस्माङ्गराग पुष्पमाल-कलापमाल
सुख सम्पत्ति दाता नमः शिवायः ॥ ६ ॥
कैलास शैल-विनिवास वृषाकपे
हे मृत्युञ्जय त्रिनयन त्रिजगन्निवास।
नारायण प्रिय मदापह शक्तिनाथ
सुख समृद्धि दाता नमः शिवायः ॥ ७ ॥
विश्वात्मक त्रिभुवनैक-गुणाभिवेश।
हे विश्वबन्धुकरुणामय दीनबन्धो
सम्पत्ति सुख दाता नमः शिवायः ॥ ८ ॥
गौरीविलासभुवनाय महेश्वराय
पञ्चाननाय शरणागतरक्षकाय।
शर्वाय सर्वजगतामधिपाय तस्मै
सर्व सम्पत्त करणायः नमः शिवायः ॥ ९ ॥

☆

पशुपत्यष्टकम्

पशुपतीन्दुपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम्।
प्रणत-भक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम्॥ १ ॥
(न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम्।
अवति कोऽपि न कालवशं गतं भजत रे मनुजा गिरिजापतिम्) ॥ २ ॥
मुरज-डिण्डिम-वाद्य-विलक्षणं मधुर-पञ्चमनाद-विशारदम्।
प्रमथभूतगणैरपि सेवितं भजत रे मनुजा गिरिजापतिम्॥ ३ ॥
शरणदं सुखदं शरणान्वितं शिव शिवेति शिवेति नतं नृणाम्।
अभयदं करुणावरुणालयं भजत रे मनुजा गिरिजापतिम्॥ ४ ॥
नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं वृषभध्वजम्।
चितिरजोधवलीकृतविग्रहं भजत रे मनुजा गिरिजापतिम्॥ ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मखविनाशकरं शशिशेखरं सततमध्वरभाजिफलप्रदम्।
प्रलयदग्ध, सुराऽसुरमानवं भजत रे मनुजा गिरजापतिम्॥ ६॥
मदमपास्य चिरं हृदि संस्थितं मरण-जन्म-जरा-भय-पीडितत्।
जगदुदीक्ष्य समीपभयाकुलं भजत रे मनुजा गिरिजापतिम्॥ ७॥
हरिविरञ्चि सुराधिप पूजितं यमजनेश-धनेश समस्कृतम्।
त्रिनयनं भूवनत्रितयाधिपं भजत रे मनुजा गिरिजापतिम्॥ ८॥
पशुपतेरिदमष्टकमद्भुतं विरचितं पृथिवीपतिसूरिणा।
पठति सश्रृणुते मनुजः सदा शिवपुरीं वसते लभते मुदम्॥ ९॥

☆

श्री रुद्राष्टकम्

नमामीशमीशाननिर्वाणरूपं विभुं व्यापकं ब्रह्मवेदस्वरूपम्।
अजं निर्गुणं निर्विकल्पं निरीहं चिदाकारमाकाशवासं भजेहऽहम्॥ १॥
निराकामोङ्कारमूलं तुरीयं गिराज्ञानगोतीतमीशं गिरीशम्।
करालं महाकालकालं कृपालं गुणागारसंसारपारं नतोऽहम्॥ २॥
तुषाराद्रिसङ्काशगौरं गंभीरं मनोभूतकोटिप्रभासी शरीम्।
स्फुरन्मौलिकल्लोलिनी चारुगङ्गा लसद्भालबालेन्दु कण्ठे भुजङ्गा॥ ३॥
चलत्कुण्डलं शुभ्रनेत्रं विशालं प्रसनाननं नीलकंठ दयालुम्।
मृगधीशचर्माम्मबरं मुंडमालं प्रियं शङ्करं सर्वनाथं भजामि॥ ४॥
प्रचंडं प्रकृष्टं प्रगल्भं परेशमखंडं भजे भानुकोटिप्रकाशम्।
त्रयीशूलनिर्मूलनं शूलपाणिं भजेऽहं भवानीपतिं भावगम्यम्॥ ५॥
कलातीत-कल्याणकल्पान्तकारी सदा सज्जनानन्ददाता पुरारिः।
चिदानन्दसन्दोहमोहापहारी प्रसीद प्रसीद प्रभो मन्मथारिः॥ ६॥
न यावदुमानाथपादारविन्दं भजन्तीह लोके परे वा नराणाम्।
न तावत्सुखं शान्तिसन्तापनाशं प्रसीद प्रभो सर्वभूताधिवासं॥ ७॥
न जानामि योगं जपं नैव पूजां नतोऽहं सदा सर्वदा देव तुभ्यम्।
जराजन्मदुःखौघतातप्यमानं प्रभो पाहि शापान्नमामीश शम्भो॥ ८॥
रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतुष्टये।
ये पठन्ति नराः भक्त्याः तेषां शम्भुः प्रसीदति॥ ९॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लिङ्गाष्टकम्

ब्रह्ममुरारि-सुरार्चितालिङ्गं निर्मल-भासित-शोभित-लिङ्गम्।
जन्मज-दुःखविनाशक-लिङ्गं तत्प्रणमामि सदाशिवङ्गिम्॥ १॥
देवमुनि-प्रवरार्चित-लिङ्गं कामदहं करुणाकरलिङ्गम्।
रावणदर्प-विनाशन-लिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥ २॥
सर्वसुगन्धि-सुलेपितलिङ्गं बुद्धिविवर्धन-कारणलिङ्गम्।
सिद्ध-सुराऽसुरवन्दितलिगं तत्प्रणमामि सदाशिवलिंगम्॥ ३॥
कनक-महामणि-भूषितलिंगं फणिपति-वेष्टित-शोभितलिंगम्।
दक्षसुयज्ञ-विनाशकलिङ्गं तत्प्रणमामि सदाशिवलिंगम्॥ ४॥
कुंकुम-चन्दनलेपितलिंगं पङ्कजहार-सुशोभितलिंगम्।
सञ्चित-पाप विनाशनलिङ्गं तत्प्रणमामि सदाशिवलिंगम्॥ ५॥
देवगणार्चित-सेवितलिंगं भावैर्भक्तिभिरेव च लिंगम्।
दिनकरकोटि-प्रभाकर लिंगं तत्प्रणमामि सदाशिवलिंगम्॥ ६॥
अष्टदलोपरि वेष्टितलिंगं सर्वसमुद्भवकारणलिंगम्।
अष्टदरिद्र विनाशितलिंगं तत्प्रणमामि सदाशिवलिंगम्॥ ७॥
सुरगुरु-सुरवर-पूजितलिंगं सुरवनपुष्प-सदार्चितलिंगम्।
परात्परं परमात्मकलिंगं तत्प्रणमामि सदाशिवलिंगम्॥ ८॥

लिंगाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥ ९॥

☆

बिल्वाष्टकम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम्।
त्रिजन्मपाप-संहारमेकबिल्व पत्रं शिवार्पणम्॥ १॥
त्रिशाखैर्बिल्वपत्रैश्च ह्यच्छिद्रः कोमलैः शुभैः।
शिवपूजां करिष्यामि ह्येकबिल्वं शिवार्पणम्॥ २॥
अखण्डबिल्वपत्रेण पूजिते नन्दिकेश्वरे।
शुद्धयन्ति सर्वपापेभ्यो ह्येकबिम्बं शिवार्पणम्॥ ३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शालिग्रामशिलामेकां विप्राणां जातु अर्पयेत्।
सोमयज्ञ-महापुण्यमेकबिल्व शिवार्पणम्॥ ४॥
दन्तिकोटिसहस्राणि वाजपेयशतानि च।
कोटिकन्या-महादानमेकबिल्वं शिवार्पणम्॥ ५॥
लक्ष्म्याः स्तनत उत्पन्नं महादेवस्य च प्रियम्।
बिल्ववृक्षं प्रयच्छामि ह्येकबिल्वं शिवार्पणम्॥ ६॥
दर्शन बिल्ववृक्षस्य स्पर्शनं पापनाशनम्।
अघोरपापसंहारमेकबिल्वं शिवार्पणम्॥ ७॥
मूलतो ब्रह्मारूपाय मध्यतो विष्णुरूपिणे।
अग्रतः शिवरूपाय ह्येकबिल्वं शिवार्पणम्॥ ८॥
बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ।
सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात्॥ ९॥

☆

शङ्कराष्टकम्

शीर्षजटागणभारं गरलाहारं समस्तसंहारम्।
कैलासाद सद्विविहारं पारं भववारिधेरहं बन्दे॥ १॥
चन्द्रकलोज्जवलभालं कण्ठव्यालं जगत्त्रयीपालम्।
कृतनरमस्तकमाल कालं कालस्य कोमलं वन्दे॥ २॥
कोपेक्षण-हतकामं स्वात्मरामं नगेन्द्रजावामम्।
संसृतिशोक-विरामं श्याम कण्ठेन कारणं बन्दे॥ ३॥
कटितट-विलसित -नागं खंडितयागं महाद्भुतत्याम्।
विगतविषयरसरागं भागं यज्ञेषु बिभ्रते बन्दे॥ ४॥
त्रिपुरादिक-दनुजान्तं गिरिजाकान्तं सदैव संशान्तम्।
लीलाविजित -कृतान्तं भान्तं स्वान्तेषु देहिनां बन्दे॥ ५॥
सुरसरिदाप्लुतकेशं त्रिदशकुलेशं हृदालयावेशम्।
बिगताशेषक्लेशं देशं सर्वेष्टसम्पदां बन्दे॥ ६॥
करतल-कलितपिनाकं विगतजराकं सुकर्मणां पाकम्।
परपदवीतवराकं नाकङ्गमपूगवन्दितं वन्दे॥ ७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूति-विभूषित कार्य दुस्तरमायं विवर्जितापायम्।
प्रमथसमूहसहायं सायंप्रातर्निरंतरं बन्दे॥ ८॥
यस्तु पदाष्टकमेतद् ब्रह्माहनन्देन निर्मित नित्यम्।
पठति समाहितचेताः प्राप्नोत्यन्ते स शैवमेव पंदम्॥ ९॥

☆

महादेवाष्टकम्

शिवं शान्तं शुद्धं प्रकटमकलङ्कं श्रुतिनुतं
महेशानं शम्भुं सकल-सुर-संसेव्यचरणम्।
गिरीशं गौरीशं भवभयहरं निष्कलमजं
महादेवं वन्दे भक्त जन मंगल करणम्॥ १॥

सदा सेव्यं भक्तेर्हृदि हृदि वसन्तं गिरिशय-
मुमाकान्तं क्षान्तं करधृतपिनाकं भ्रमहरम्।
त्रिनेत्रं पञ्चास्यं दशभुजमनन्तं शशिधरं
महादेवं वन्दे भक्त जन मंगल करणम्॥ २॥

चिताभस्मालिप्तं भुजग-मुकुटं विश्वसुखदं
धनाध्यक्षस्याङ्गं त्रिपुरवधकर्तारमनधम्।
कीरीटीखट्वाङ्गो हय्युरसि च दधानं मृतिहरं
महादेव वन्दे भक्त जन मंगल करणम्॥ ३॥

सदोत्साहं गंगाधरचलमानन्दकरणं
पुरारातिं भतिं रतिपतिहरं दीप्तवदनम्।
जटाजूटैर्जुष्टं रसमुख-गणेशानपितरं
महादेवं वन्दे भक्त जन मंगल करणम्॥ ४॥

वसन्तं कैलासे सुरमुनिसभायां हि नितरां
ब्रूवाणं सद्धर्मं निखिलमनुजानन्दजनकम्।
महेशानी साक्षात् सनकमुनि-देवर्षिसहिता
महादेवं वन्दे भक्त जन मंगल करणम्॥ ५॥

शिवां स्वे वामांगे गुहगणपतिं दक्षिणभुजे
गले कालं व्यालं जलधिगरलं कण्ठविवरे।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ललाटे श्वेतेन्दुं जगदपि दधानं च जठरे
महादेवं वन्दे भक्त जन मंगल करणम्।। ६।।
सुराणां दैत्यानां बहुलमनुजानां बहुविधं
तपःकुर्वाणानां झटिति फलदातारमखिलम्।
सुरेश विघ्नेशं जलनिधिसुताकान्तहृदयं
महादेवं वन्दे भक्त जन मंगल करणम्।। ७।।
वसानं वैयाघ्रीं मृदुललितां कृत्तिमजरां
वृषारूढं सृष्ट्यादिषु कमलजाद्यात्मवपुषम्।
अतर्क्यं निर्मायं तदपि फलदं भक्तसुखद
महादेवं वन्दे भक्त जन मंगल करणम्।। ८।।
इंद स्तोत्रं शम्भोर्दूरितदलल धान्यंधनदं
हृदि ध्यात्वा शम्भुं तदनु फूलचर्न्दनं रचितम्।
नरः सायं प्रातः पठति नियतं तस्य विपदः
क्षयं यान्ति स्वर्गं ब्रजति सहसा सोऽपि मुदितः।। ९।।

☆

विश्वनाथाष्टकम्

गङ्गातरङ्गरमणीय - जटाकलापं
गौरीनिरन्तर-विभूषित-वामभागम् ।
नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम्।। १।।
वाचामगोचरनेकगुणस्वरूपं
वागीश-विष्णु-सुदसेवित-पादपीठम्।
वामेन विग्रहवरेण कलत्रवन्तं
वाराणसीपुरपतिं भज विश्वनाथम्।। २।।
भूताधिपं भुजग-भूषण-भूषिताङ्गं
व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम्।
पाशाङ्कुशा भयवरप्रद-शूलपाणिं
वाराणसीपुरपतिं भज विश्वनाथम्।। ३।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शीतांशुशोभित-किरीट-विराजमानं
भालेक्षणानल-विशोषित-पञ्चबाणम् ।
नागाधिपा-रचित-भासुरकर्णपूरं
वाराणसीपुरपतिं भज विश्वनाथम् ।। ४ ।।

पञ्चाननं दुरितमत्त-मतङ्गजानां
नागान्तकं दनुजपुङ्गव-पन्नगानाम् ।
दावानल मरण-शोक-जराटवीनां
वाराणसीपुरपतिं भज विश्वनाथम् ।। ५ ।।

तेजोमयं सगुण-निर्गुणमद्वितीय-
मानन्दकन्दमपराजितमप्रमेयम् ।
नागात्मकं सकल-निष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथम् ।। ६ ।।

आशां विहाय परिहृत्य परस्य निन्दां
पापे मतिं च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथम् ।। ७ ।।

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्य-धैर्य-सुभगं गरलाभिरामं
वाराणीपुरपतिं भज विश्वनाथम् ।। ८ ।।

वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मुनष्यः ।
विद्यां श्रियं विपुल-सौख्यमनन्तकीर्तिं,
सम्प्राप्य देहविलये लभते च मोक्षम् ।। ९ ।।

विश्वनाथाष्टकमिदं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ।। १० ।।

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विश्वनाथाष्टकस्तोत्रम्

आदिशम्भु-स्वरूप-मुनिवर-चन्द्रशीश-जटाधरं
रूपमाल-विशाललोचन-वाहनं वृषभध्वजम्।
नागचन्द्र-त्रिशूलडमरू भस्म-अंगविभूषणं
श्रीनीलकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ १ ॥

गङ्गसङ्ग-उमाङ्गवामे-कामदेव-सुसेवितं
नादबिन्दुज-योगसाधन-पञ्चवक्त्रत्रिलोचनम् ।
इन्दु-बिन्दुविराजशशिधर-शङ्करं सुरवन्दितं
श्रीनीलिकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ २ ॥

ज्योतिर्लिंग-स्फुलिंगफणिमणि-दिव्यदेवसुसेवितं
मालतीसुर-पुष्पमाला-कञ्ज-धूप-निबेदितम् ।
अनलकुम्भ सुकुम्भझलकत-कलशकञ्चनशोभितं
श्रीनीलकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ ३ ॥

मुकुटकिरीटभूषणकनककुण्डलरञ्जितं मुनिमण्डितं
हारमुक्ता-कनकसूत्रित-सुन्दरं सुविशेषितम्।
गन्धमादन-शैल-आसन-दिव्यज्योतिप्रकाशनं
श्रीनीलकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ ४ ॥

मेघडम्बरछत्रधारन-चरनकमलविलासितं
पुष्परथ-परमदनमूरति-गौरिसङ्गसदाशिवम् ।
क्षेत्रपाल-कपाल-भैरव-कुसुम-नवग्रहभूषितं
श्रीनीलकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ ५ ॥

त्रिपुरदैत्य-विनाशकारक-शङ्करं फलदायकं
रावणाद्दशकमलमस्तक-पूजितं वरदायकम्।
कोटिमन्मथमथन-विषधर-हारभूषणे-भूषितं
श्रीनीलकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ ६ ॥

मथितजलधिज-शेषविगलित-कालकूटविशोषणं
ज्योतिविगलितदीपनयन-त्रिनेत्रशम्भु-सुरेश्वरम् ।
महादेवसुदेव-सुरपतिसेव्य-देवविश्वम्भरं
श्रीनीलकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ ७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रुद्ररूपभयङ्करं कृतभूरिपान-हलाहलं
गगनवेधित-विश्वमूल-त्रिशूलकरधरशङ्करम् ।
कामकुञ्जर-मानमर्दन-महाकाल-विश्वेश्वरं
श्रीनीलकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ ८ ॥
ऋतुवसन्तविलास-चहुँदिशि दीप्यते फलदायकं
दीव्यकाशिकधामवासी-मनुजमङ्गलदायकम् ।
अम्बिकातट-बैद्यनाथं शैलशिखरमहेश्वरम्
श्रीनीलकण्ठहिमाद्रिजलधरविश्वनाथविश्वेश्वरम् ॥ ९ ॥
शिवस्तोत्र-प्रतिदिन-ध्यानधर-आनन्दमय-प्रतिपादितं
धन-धान्य-सम्पति-गृहविलासित-विश्वनाथ-प्रसादजम् ।
हर-धाम-चिरगण-सङ्गशोभित-भक्तवर-प्रियमण्डितं
आनन्दवन-आनन्दछवि-आनन्दकन्द-विभूषितम् ॥ १० ॥

☆

विश्वनाथस्तवः

भवानीकलत्रं हरं शूलपाणिं शरण्यं शिवं सर्पहारं गिरीशम् ।
अज्ञानान्तकं भक्तविज्ञानदं ते भजेऽहं मनोऽभीष्टदं विश्वनाथम् ॥ १ ॥
अजं पञ्चवक्त्रं त्रिनेत्रं गुणज्ञं दयाज्ञानसिन्धुं प्रभुं प्राणनाथम् ।
विभुं भावगम्यं भवं नीलकण्ठं भजेऽहं मनोऽभीष्टदं विश्वनाथम् ॥ २ ॥
(चिताभस्मभूषार्चिताभासुराङ्गं श्मशानालयं त्र्यम्बकं मुण्डमालम् ।
कराभ्यां दधानं त्रिशूलं कपालं भजेऽहं मनोऽभीष्टदं विश्वनाथम्) ॥ ३ ॥
अघघ्नं महाभैरवं भीमदंष्ट्रं निरीहं तुषाराचलाभाङ्गगौरम् ।
गजारिं गिरौ संस्थितं चन्द्रचूडं भजेऽहं मनोऽभीष्टदं विश्वनाथम् ॥ ४ ॥
विधुं भालदेशे विभातं दधानं भुजङ्गेशसेव्यं पुरारिं महेशम् ।
शिवासंगृहीतार्द्धदेहं प्रसन्नं भजेऽहं मनोऽभीष्टदं विश्वनाथम् ॥ ५ ॥
भवानीपतिं श्रीजगन्नाथनाथं गणेशं गृहीतं बलीवर्दयानम् ।
सदा विघ्नविच्छेदहेतुं कृपालुं भजेऽहं मनोऽभीष्टदं विश्वनाथम् ॥ ६ ॥
अगम्यं नटं योगिभिर्दण्डपाणिं प्रसन्नाननं व्योमकेशं भयघ्नम् ।
स्तुतं ब्रह्ममायादिभिः पादकञ्जं भजेऽहं मनोऽभीष्टदं विश्वनाथम् ॥ ७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मृडं योगमुद्राकृतं ध्याननिष्ठं धृतं नागयज्ञोपवीतं त्रिपुण्ड्रम् ।
ददानं पदाम्भोजनम्राय कामं भजेऽहं मनोऽभीष्टदं विश्वनाथम् ॥ ८ ॥
मृडस्य स्वयं यः प्रभाते पठेन्ना हृदिस्थः शिवस्तस्य नित्यं प्रसन्न ।
चिरस्थं धनं मित्रवर्गं कलत्रं सुपुत्रं मनोऽभीष्टमोक्षं ददाति ॥ ९ ॥
योगीशमिश्रमुखपङ्कजनिर्गतं यो विश्वेश्वराष्टकमिदं पठति प्रभाते ।
आसाद्य शङ्करपदाम्बुजयुग्मभक्तिं भुक्त्वा समृद्धिमिह याति शिवान्तिकेऽन्ते ॥ १० ॥

☆

श्रीकाशीविश्वनाथस्तोत्रम्

कण्ठे यस्य लसत्करालगरलं गङ्गाजलं मस्तके
वामांगे गिरिराजराजतनया जाया भवानी सती ।
नन्दि-स्कन्दगणाधिराज-सहिता श्रीविश्वनाथप्रभुः
काशीमन्दिरसंस्थितोऽखिलगुरुर्देयात् सदा मङ्गलम् ॥ १ ॥
यो देवैरसुरैर्मुनीन्द्रतनयैर्गन्धर्वयक्षोरगै-
र्नागैर्भूतलवासिभिर्द्विजवरैः संसेवितः सिद्धये ।
या गङ्गोत्तरवाहिनी परिसरे तीर्थैरसंख्यैर्वृता
सा काशी त्रिपुरारिराजनगरी देयात् सदा मंगलम् ॥ २ ॥
तीर्थानां प्रवरा मनोरथकरी संसारपारापरा-
नन्दा नन्दिगणेश्वरैरुपहिता देवैरशेषैः स्तुता ।
या शम्भोर्मणिकुण्डलैककणिका विष्णोस्तपोदीर्घिका
सेयं श्रीमणिकर्णिका भगवती देयात् सदा मंगलम् ॥ ३ ॥
एषा धर्मपताकिनी तटरुहासेवावसन्नाकिनी
पश्यन् पातकिनी भगीरथतपःसाफल्यदेवाकिनी ।
प्रमारूढपताकिनी गिरसुता सा केकरास्वाकिनी
काश्यामुत्तरवाहिनी सुरनदी देयात् सदा मंगलम् ॥ ४ ॥
विघ्नावास-निवास-कारणमहा-गण्डस्थलालम्बितः
सिन्दूरारुणपुञ्जचन्द्रकिरण-प्रच्छादिनागच्छविः ।
श्रीविश्वेश्वरवल्लभो गिरिजया सानन्दकानन्दितः
स्मेरास्यस्तव ढुण्ढिराजमुदितो देयात् सदा मंगलम् ॥ ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केदारः कलशेश्वरः पशुपतिर्धर्मेश्वरो मध्यमो
ज्येष्ठेशो पशुश्च कन्दुकशिवो विघ्नेश्वरो जम्बुकः।
चन्द्रेशो ह्यमृतेश्वरो भृगुशिवः श्रीवृद्धकालेश्वरो
मध्येशो मणिकर्णिकेश्वरशिवो देयात् सदा मंगलम्॥ ६॥

गोकर्णस्त्वथ भारभूतनुदनुः श्रीचित्रगुप्तेश्वरो
यक्षेशस्तिलपर्णसङ्गमशिवो शैलेश्वरः कश्यपः।
नागेशोऽग्निशिवो निधीश्वरशिवोऽगस्तीश्वरस्तारक-
ज्ञानेशोऽपि पितामहेश्वरशिवो देयात् सदा मंगलम्॥ ७॥

ब्रह्माण्डं सकलं मनोषितरसै रत्नैः पयोभिर्हरं
खेलैः पूरयते कुटुम्बनिलयान् शम्भोर्विलासप्रदा।
नानादिव्यलताविभूषितवपुः काशीपुराधीश्वरी
श्रीविश्वेश्वरसुन्दरी भगवती देयात् सदा मंगलम्॥ ८॥

या देवी महिषासुरप्रमथनी या चण्डमुण्डापहा
या शुम्भासुररक्तबीजदमनी शक्रादिभिः संस्तुता।
या शूलासिधनुःशराभयकरा दुर्गादिसंदक्षिणा-
माश्रित्याश्रित-विघ्नशं समयतु देयात् सदा मंगलम्॥ ९॥

आद्या श्रीर्विकटा ततस्तु विरजा श्रीमंगला पार्वती
विख्याता कमला विशालनयना ज्येष्ठा विशिष्टानना।
कामाक्षी च हरिप्रिया भगवती श्री घण्टघण्टादिका
मौर्या षष्टिसहस्त्रमातृसहिता देयात् सदा मंगलम्॥ १०॥

आदौ पञ्चनदं प्रयागमपरं केदारकुण्डं कुरु-
क्षेत्रं मानसकं सरोऽमृतजलं शावस्य तीर्थं परम्।
मत्स्योदर्यथ दण्डखाण्डसलिलं मन्दाकिनी जम्बुकं
घण्टाकर्ण-समुद्रकूपसहितो देयात् सदा मंगलम्॥ ११॥

रेवाकुण्डजलं सरस्वतिजलं दुर्वासकुण्डं ततो
लक्ष्मीतीर्थलवाङ्कुशस्य सलिलं कन्दर्पकुण्डं तथा।
दुर्गाकुण्डमसीजलं हनुमतः कुण्डप्रतापोर्जितः
प्रज्ञानप्रमुखानि वः प्रतिदिनं देयात् सदा मंगलम्॥ १२॥

आद्यः कूपवरस्तु कालदमनः श्रीवृद्धकपोऽपरो
विख्यातस्तु पराशरस्तु विदितः कूपः सरो मानसः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जैगीषव्यमुनेः शशाङ्कनृपतेः कूपस्तु धर्मोद्भवः
ख्यातः सप्तसमुद्रकूपसहितो देयात् सदा मंगलम् ॥ १३ ॥
लक्ष्मीनायक-बिन्दुमाधव-हरिर्लक्ष्मीनृसिंहस्ततो
गोविन्दस्त्वथ गोपिकाप्रियतमः श्रीनारदः केशवः।
गंगाकेशववामनाख्यतदनु श्वेतो हरिः केशवः
प्रह्लादादिसमस्तकेशवगणो देयात् सदा मंगलम् ॥ १४ ॥
लोलार्को विमलार्कमायुखरविः संवर्तसंज्ञो रवि-
र्विख्यातो द्रुपदुःखखोल्कमरुणः प्रोक्तोत्तरार्को रविः।
गंगार्कस्त्वथ बृद्धवृद्धिविबुधा काशीपुरीसंस्थिताः
सूर्या द्वादशसंज्ञकाः प्रतिदिनं देयात् सदा मंगलम् ॥ १५ ॥
आद्यो ढुण्ढिविनायको गणपतिश्चिन्तामणिः सिद्धिदः
श्येनाविघ्नपतिस्तु वक्रवदनः श्रीपाशपाणिः प्रभुः।
आशापक्षविनायकाप्रषकरो मोदादिकः षड्गुणो
लोलार्कादिविनायकाः प्रतिदिनं देयात् सदा मंगलम् ॥ १६ ॥
हेरम्बो नलकूबरो गणपतिः श्रीभीमचण्डीगणो
विख्यातो मणिकर्णिकागणपतिः श्रीसिद्धिदो विघ्नपः।
मुण्डश्चण्डमुखश्च कष्टहरणः श्रीदण्डहस्तो गणः
श्रीदुर्गाख्यगणाधिपः प्रतिदिनं देयात् सदा मंगलम् ॥ १७ ॥
आद्यो भैरवभीषणस्तदपरः श्रीकालराजः क्रमा-
च्छ्रीसंहारकभैरवस्त्वथ रुरुश्चोन्मत्तको भैरवः।
क्रोधश्चण्डकपालभैरववरः श्रीभूतनाथादयो
ह्यष्टौ भैरवमूर्तयः प्रतिदिनं देयात् सदा मंगलम् ॥ १८ ॥
आघातोऽम्बिकया सह त्रिनयनः सार्धं गणैर्नन्दितां
काशीमाशुविशन् हरः प्रथमतो वार्षध्वजेऽवस्थितः।
आयाता दश घेनवः सुकपिला दिव्यैः पयोभिर्हरं
ख्यातं तद्वृषभध्वजेन कपिलं देयात् सदा मंगलम् ॥ १९ ॥
आनन्दाख्यवनं हि चम्पकवनं श्रीनैमिषं खाण्डवं
पुण्यं चैत्ररथं त्वशाकविपिनं रम्भावनं पावनम्।
दुर्गारण्यमथोऽपि कैरववनं वृन्दावनं पावनं
विख्यातानि वनानि वः प्रतिदिनं देयात् सदा मगलम् ॥ २० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अलिकुलदलनीलः कालदंष्ट्राकरालः सजलजलदनालो व्यालयज्ञोपवीतः ।
अभयवरदहस्तो डामरोद्दामनादः सकलदुरितभक्षो मंगल वो ददातु ॥ २१ ॥
अर्धाङ्गे विकटा गिरीन्द्रतनयो गौरी सती सुन्दरी
सर्वाङ्गे विलसद्विभूतिधवलः कालो विशालेक्षणः ।
वीरेशः सहनन्दिभृङ्गि सहितः श्रीविश्वनाथः प्रभुः
काशीमन्दिरसंस्थितोऽखिलगुरुर्देयात् सदा मंगलम् ॥ २२ ॥
यः प्रातः प्रयतः प्रसन्नमनसा प्रेमप्रमोदाकुलः
ख्यातं तत्र विशिष्टपादभुवनेशेन्द्रादिभिर्यत् स्तुतम् ।
प्रातः प्राङ्मुखमासनोत्तमगतो ब्रूयाच्छृणोत्यादरात्
काशीवासमुखान्यवाप्य सततं प्रीते शिवे धूर्जटिः ॥ २३ ॥

☆

शिवाष्टकम्

प्रभु प्राणनाथं विभुं विश्वनाथं जगन्नाथनाथं सदानन्दभाजाम् ।
भवद्भव्यभूतेश्वरं भूतनाथं शिवं शङ्करं शम्भीशानमीडे ॥ १ ॥
गले पुष्पमालं तनौ सर्पजालं महाकालकालं गणेशाधिपालम् ।
जटाजूटभङ्गोत्तरंगैर्विशालं शिवं शङ्करं शम्भूमीशानमीडे ॥ २ ॥
मुदामाकरं मण्डनं मण्डयन्तं महामण्डलं भस्मभूषाधरतम् ।
अनादिं ह्यपारं महामोहमारं शिवं शङ्करं शम्भुमीशानमीडे ॥ ३ ॥
तटाधोनिवासं महाट्टाट्टहासं महापापनाशं सदा सुप्रकाशम् ।
गिरीशं गणेशं सुरेशं महेशं शिवं शङ्करं शम्भुमीशानमीडे ॥ ४ ॥
गिरीन्द्रात्मजासंगृहीतार्धदेहं गिरौ संस्थितं सर्वदासन्नगेहम् ।
परब्रहम-ब्रह्मादिभिर्वन्द्यमानं शिवं शङ्करं शम्भुमीशानमीडे । ५ ॥
कपालं त्रिशुलं कराभ्यां दधानं पदाम्भोजनम्राय काम ददानम् ।
बलीवर्दयान सुराणां प्रधानं शिवं शङ्करं शम्भुमीशानमीडे ॥ ६ ॥
शरच्चन्द्रगात्रं गुणानन्दपात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ।
अपर्णाकलत्रं चरित्रं विचित्रं शिवं शङ्करं शम्भुमीशानमीडे ॥ ७ ॥
हरं सर्पहारं चिताभूविहारं भवं वेदसारं सदा निर्विकारम् ।
कैलाशे वसन्तं मनोजं दहन्तं शिवं शङ्करं शम्भुमीशानमीडे ॥ ८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तवं यः प्रभाते नरः शूलपाणेः पठेत सर्वदा भर्गभावानुरक्तः।
स पुत्रं धनं धान्यमित्रं कलत्रं विचित्रः समासाद्य मोक्षं प्रयाति ॥ ९ ॥

☆

शिवरामाष्टकम्

शिव हरे शिव राम सखे प्रभो त्रिविधतापनिवारण हे विभो ॥
अज जनेश्वर यादव पाहि मां शिव हरे विजयं कुरु मे वरम् ॥ १ ॥
कमललोचन राम दयानिधे हर गुरो गजरक्षक गोपते।
शिवतनो भव शङ्कर कृपा निधान शिव हरे विजयं कुरु मे वरम् ॥ २ ॥
स्वजनरञ्जन मङ्गल-मन्दिरं भजति तं पुरुषं परमं पदम्।
भवति तस्य सुखं परमद्भुतं शिव हरे विजयं कुरु मे वरम् ॥ ३ ॥
जय युधिष्ठिर-वल्लभ भूपते जय जयार्जितपुण्यपयोनिधे।
जय कृपामय कृष्ण नमोऽस्तु ते शिव हरे विजयं कुरु मे वरम् ॥ ४ ॥
भवविमोचन माधव मापते सुकविमानसहंस शिवारते।
जनकजारत राघव रक्ष मां शिव हरे विजयं कुरु मे वरम् ॥ ५ ॥
अवनिमण्डलमङ्गल उमापते जलदसुन्दर राम रमापते।
निगम-कीर्ति-गुणार्णव गोपते शिव हरे विजयं कुरु मे वरम् ॥ ६ ॥
पतित-पावन-नाममयी लता तव यशो विमल परिगीयते।
तदपि माधव मां किमुपेक्षसे शिव हरे विजयं कुरु मे वरम् ॥ ७ ॥
अमरतापरदेव रमापते विजयतस्तव नाम धनोपमम्।
मयि कथं करुणार्णव जायते शिव हरे विजयं कुरु मे वरम् ॥ ८ ॥
हनुमतः प्रिय चापकर प्रभो सुरसरिद्धृत शेखर हे गुरो।
मम विभो किमु विस्मरणं कृतं शिव हरे विजयं कुरु मे वरम् ॥ ९ ॥
नरहरेति परं जनसुन्दरं पठति यः शिवरामकृतस्तवम्।
विशति रामरमाचरणाम्बुजे शिव हरे विजयं कुरु मे वरम् ॥ १० ॥
प्रातरुत्थाय यो भक्त्या पठेदेकाग्र मानसः।
विजयो जायते तस्य विष्णु सान्निध्यमाप्नुयात् ॥ ११ ॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्धनारीश्वरस्तोत्रम्

मन्दारमाला-कुलितालकायै कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ।। १ ।।
एकः स्तनस्तुङ्गतरः परस्य वार्तामिव प्रष्टुमगान्मुखाग्रम् ।
यस्याः प्रियार्धस्थितिमुद्वहन्त्याः सा पातु वः पर्वतराजपुत्री ।। २ ।।
यस्योपवीतगुण एव फणावृतैक वक्षोरुहः कुचपटोयति वामभागे ।
तस्यै ममाऽस्तु तमसामवसानसीम्ने चन्द्रार्धमौलिशिरसे महसे नमस्या । ३ ।।
स्वेदार्द्रवामकुच-मण्डनपत्रभङ्ग-संशोषि-दक्षिणकरांगुलिभस्मरेणुः ।
स्त्री-पुं-नपुंसकपदव्यतिलङ्घिनी वः शम्भोस्तनुःसुखयतु प्रकृतिश्चतुर्थी ।। ४ ।।

☆

अर्धनारीनटेश्वरस्तोत्रम्

चाम्पेय-गौरार्ध-शरीरकायै कर्पूरगौरार्धशरीरकाय ।
धम्मिल्लकायै च जटाधराय नमः शिवायै च नमः शिवाय ।। १ ।।
कस्तूरिका-कुंकुम-चर्चितायै चितारजः पुञ्ज-विचर्चिताय ।
कृतस्मरायै विकृतस्मराय नमः शिवायै च नमः शिवाय ।। २ ।।
चलत् क्वणत्-कङ्कणनूपुरायै पादाब्जराजत्फनिनूपुराय ।
हेमाङ्गदायै भुजगाङ्गदाय नमः शिवायै च नमः शिवाय ।। ३ ।।
विशालनीलोत्पललोचनायै विकासिपङ्केरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय नमः शिवायै च नमः शिवाय ।। ४ ।।
मन्दारमाला कुलितालकायै कपालमालाङ्कितकन्धराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ।। ५ ।।
अम्भोधर-श्यामल-कुन्तलायै तडित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय ।। ६ ।।
प्रपञ्चसृष्ट्युन्मुखलास्यकायै समस्तसंहारकताण्डवाय ।
जगज्जनन्यै-जगदेकपित्रे नमः शिवायै च नमः शिवाय ।। ७ ।।
प्रदीप्तरत्नोज्वलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय नमः शिवायै च नमः शिवाय ।। ८ ।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतत् पठेदष्टकमिष्टदं यो भक्त्या स मान्यो भुवि दीर्घजीवी।
प्राप्नोति सौभाग्यमनन्तकाल भूयात् सदा तस्य समस्तसिद्धिः॥ ९॥

☆

द्वादशज्योतिर्लिङ्गस्मरणम्

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम्।
उज्जयिन्यां महाकालमोङ्कारममलेश्वरम्॥ १॥
परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम्।
सेतुबन्धे तु रामेशं नागेशं दारुकावने॥ २॥
वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे।
हिमालये तु केदारं घुसृणेशं शिवालये॥ ३॥
एतानि ज्योतिर्लिङ्गानि सायं-प्रातः पठेन्नरः।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति॥ ४॥

☆

द्वादशज्योतिर्लिङ्गस्तोत्रम्

सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चद्रकलावतंसम्।
भक्तिप्रदानाय कृपावतीर्णं तं सोमनाथं शरणं प्रपद्ये॥ १॥
श्रीशैलश्रृङ्गे विबुधातिसङ्गे तुलाद्रितुङ्गेऽपि मुदा वसन्तम्।
तमर्जुनं मल्लिकपूर्वमेकं नमामि संसारसमुद्रसेतुम्॥ २॥
अवन्तिकायां विहितावतारं मुक्तिप्रदानाय च सज्जनानाम्।
अकालमृत्योः परिरक्षणार्थं वन्दे महाकालमहासुरेशम्॥ ३॥
कावेरिकानर्मदयोः पवित्रे समागमे सज्जनतारणाय।
सदैव मान्धातृपरे वसन्तमोङ्कारमीशं शिवमेकमीडे॥ ४॥
पूर्वोत्तरे प्रज्वलिकानिधाने सदा वसन्तं गिरिजासमेतम्।
सुराऽसुराराधितपादपद्म श्रीवैद्यनाथं तमहं नमामि॥ ५॥
याम्ये सदङ्गे जगरेधिरम्ये विभूषिताङ्गं विविधैश्च भोगैः।
सद्भक्तिमुक्तिप्रदमीशमेकं श्रीनागनाथं शरणं प्रपद्ये॥ ६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महाद्रिपार्श्वे च तटे रमन्तं सम्पूज्यमानं सततं मुनीन्द्रैः।
सुराऽसुरैर्यक्षमहोरगाद्यैः केदारमीशं शिवमेकमीडे ॥ ७ ॥
सह्याद्रिशीर्षे विमले बसन्तं गोदावरीतीरपवित्रदेशे।
यद्दर्शनात् पातकमाशु नाशं प्रयाति तं त्र्यम्बकमीशमीडे ॥ ८ ॥
सुताम्रपर्णीजलराशियोगे निबध्य सेतुं विशिखैरसंख्यैः।
श्रीरामचन्द्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि ॥ ९ ॥
यं डाकिनी-शाकिनिका समाजे निषेव्यमाणं पिशिताशनैश्च।
सदैव भीमादिपदप्रसिद्धं तं शङ्करं भक्तहितं नमामि ॥ १० ॥
सानन्दमानन्दवने वसन्तमानन्दकन्दं हतपापवन्दम्।
वाराणसीनाथमनाथं श्रीविश्वनाथं शरणं प्रपद्ये ॥ ११ ॥
इलापुरे रम्यविशालकेऽस्मिन् समुल्लसन्तं च जगद्वरेण्यम्।
बन्दे महोदारतरस्वभावं घृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२ ॥
ज्योतिर्मयद्वादशलिंगकानां शिवात्मनां प्रोक्तमिदं क्रमेण।
स्तोत्रं पठित्वा मनुजोऽतिभक्त्या फलं तदालोक्य निजं भजेच्च ॥ १३ ॥

☆

मृतसञ्जीवनकवचम्

एवमाराध्य गौरीशं देवं मृत्युञ्जयेश्वरम्।
मृतसञ्जीवनं नाम्ना कवचं प्रजपेत् सदा ॥ १ ॥
सारात् सारतरं पुण्यं गुह्याद् गुह्यतरं शुभम्।
महादेवस्य कवचं मृतसञ्जीवनाभिधम् ॥ २ ॥
समाहितमना भूत्वा श्रृणुष्व कवचं शुभम्।
श्रुत्वैतद् दिव्यकवचं रहस्यं कुरु सर्वदा ॥ ३ ॥
वराभयकरो यज्वा सर्वदेवनिषेवितः।
मृत्युञ्जयो महादेवः प्राच्यां पातु मां सर्वदा। ४ ॥
दधानः शक्तिमभयां त्रिमुखः षड्भुजः प्रभुः।
सदाशिवोऽग्निरूपी मामाग्नेय्यां पातु सर्वदा ॥ ५ ॥
अष्टादशभुजोपेतो दण्डाभयकरो विभुः।
यमरूपी महादेवी दक्षिणस्यां सदाऽवतु ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भङ्गाभयकरो धीरो रक्षोगणनिषेवितः।
रक्षोरूपी महेशो मां नैर्ऋत्यां सर्वदाऽवतु ॥ ७ ॥
पाशाभयभुजः सर्वरत्नाकरनिषेवितः।
वरुणात्मा महादेवः पश्चिमे मां सदाऽवतु ॥ ८ ॥
गदाभयकरः प्राणनायकः सर्वदागतिः।
वायव्यां मारुतात्मा मां शङ्करः पातु सर्वदा ॥ ९ ॥
शङ्खाभयकरस्थो मां नायकः परमेश्वरः।
सर्वात्मान्तरदिग्भागे पातु मां शङ्करः प्रभुः ॥ १० ॥
शूलाभयकरः सर्वविद्यानामधिनायकः।
ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥ ११ ॥
ऊर्ध्वभागे ब्रह्मरूपी विश्वात्माऽधः सदाऽवतु।
शिरो मे शङ्करः पातु ललाटं चन्द्रशेखरः ॥ १२ ॥
भ्रूमध्यं सर्वलोकेशस्त्रिनेत्रो लोचनेऽवतु।
भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥ १३ ॥
नासिकां मे महादेव ओष्ठौ पातु वृषभध्वजः।
जिह्वां मे दक्षिणामूर्तिर्दन्तान् मे गिरिशोऽवतु ॥ १४ ॥
मृत्युञ्जयो मुखं पातु कण्ठं मे नागभूषणः।
पिनाकी मत्करौ पातु त्रिशूली हृदयं मम ॥ १५ ॥
पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः।
नाभिं पातु विरूपाक्षः पार्श्वौ मे पार्वतिपतिः ॥ १६ ॥
कटिद्वयं गिरीशो मे पृष्टं मे प्रमथाधिपः।
गुह्यं महेश्वरः पातु जंघोरुः पातु भैरवः ॥ १७ ॥
जानुनी मे जगद्धर्ता जङ्घे मे जगदम्बिका।
पादौ मे सतत पातु लोकवन्द्यः सदाशिवः ॥ १८ ॥
गिरीशः पातु मे भार्यां भवः पातु सुतान् मम।
मृत्युञ्जयो ममाऽयुष्यं चित्तं मे गणनायकः ॥ १९ ॥
सर्वाङ्ग मे सदा पातु कालकालः सदाशिवः।
एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ॥ २० ॥
मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम्।
सहस्रावर्तनं चाऽस्य पुरश्चरणमीरितम् ॥ २१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यः पठेच्छृणुयान्नित्यं श्रावयेत् सुसमाहितः।
स अकालमृत्युं निर्जित्य सदाऽऽयुष्यं समश्नुते॥ २२॥
हस्तेन वा यदा स्पृष्ट्वा मृतं सञ्जीवयत्यसौ।
आधयो व्याधयस्तस्य न भवन्ति कदाचन॥ २३॥
कालमृत्युमपि प्राप्तमसौ जयति सर्वदा।
अणिमादिगुणैश्वर्यं लभते मानवोत्तमः॥ २४॥
युद्धारम्भे पठित्वेदमष्टाविंशतिवारकम्।
युद्धमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते॥ २५॥
न ब्रह्मादीनि चास्त्राणि क्षयं कुर्वन्ति तस्य वै।
विजयं लभते देवयुद्धमध्येऽपि सर्वदा। २६॥
प्रातरुत्थाय सततं यः पठेत् कवचं शुभम्।
अक्षय्यं लभते सौख्यमिह लोके परत्र च। २७॥
सर्वव्याधि-विनिर्मुक्तः सर्वरोगविवर्जितः।
अजरामरणो भूत्वा सदा षोडशवार्षिकः। २८॥
विचरत्यखिलाँल्लोकान् प्राप्य भोगांश्च दुर्लभान्।
तस्मादिदं महागोप्यं कवचं समुदाहृतम्। २९॥
मृतसञ्जीवनं नाम्ना दैवतैरपि दुर्लभम्। ३०॥

☆

प्रदोषस्तोत्रम्

जय देव जगन्नाथ जय शङ्कर शाश्वत।
जय सर्वसुराध्यक्ष जय सर्वसुरार्चित॥ १॥
जय सर्वगुणातीत जय सर्ववरप्रद।
जय नित्य निराधार जय विश्वम्भराव्यय॥ २॥
जय विश्वैकवन्द्येश जय नागेन्द्रभूषण।
जय गौरीपते शम्भो जय चन्द्रार्धशेखर॥ ३॥
जय कोटयर्कसङ्काश जयानन्त गुणाश्रय।
जय भद्र विरूपाक्ष जयाचिन्त्य निरञ्जन। ४॥
जय नाथ कृपासिन्धो जय भक्तार्तिभञ्जन।
जय दुस्तर-संसार-सागरोत्तारण प्रभो॥ ५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रसीद मे महादेव संसारार्तस्य खिद्यतः।
सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर॥ ६॥
महादारिद्र्यमग्नस्य महापापहतस्य च।
महाशोकनिविष्टस्य महारोगातुरस्य च॥ ७॥
ऋणभारपरीतस्य दह्यमानस्य कर्मभिः।
ग्रहैः प्रपीड्यमानस्य प्रसीद मम शङ्कर॥ ८॥
दरिद्रः प्रार्थयेद् देवं प्रदोषे गिरिजापतिम्।
अर्थाढ्यो वाऽर्थ राजा वा प्रार्थयेद देवमीश्वरम्॥ ९॥
दीर्घमायुः सदाऽऽरोग्यं कोषवृद्धिर्बलोन्नतिः।
ममाऽस्तु नित्यमानन्द प्रसादात्तव शङ्कर॥ १०॥
शत्रवः संक्षयं यान्तु प्रसीदन्तु मम प्रजाः।
नश्यन्तु दस्यवो राष्ट्रे जनाः सन्तु निरापदः॥ ११॥
दुर्भिक्षमारिसन्तापाः शमं यान्तु महीतले।
सर्वसस्यसमृद्धिश्च भूयात् सुखमया दिशः॥ १२॥
एवमाराधयेद् देवं पूजान्ते गिरिजापतिम्।
ब्राह्मणान् भोजयेत् पश्चाद् दक्षिणाभिश्च पूजयेत्॥ १३॥
सर्वपापक्षयकरी सर्वरोग-निवारिणी।
शिवपूजा मयाऽऽख्याता सर्वाभीष्टफलप्रदा॥ १४॥

☆

शिवस्तुतिः

वन्दे देवमुमापतिं सुरगुरु वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्य-शशाङ्कवह्निनयनं बन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरद वन्दे शिवं शङ्करम्॥ १॥
वन्दे सर्वजगद्-विहारमतुलं वन्देऽन्धक-ध्वंसिनं
वन्दे देवशिखामणिं शशिनिभं वन्दे हरेर्वल्लभम्।
वन्दे नाग-भुजङ्ग-भूषणधरं वन्दे शिवं चिन्मयं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥ २॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वन्दे दिव्यमचिन्त्यमद्वयमहं वन्देऽर्कदर्पापहं
वन्दे निर्मूलमादिमूलमनिशं वन्दे मखध्वंसिनम्।
वन्दे सत्यमनन्तमाद्यमभयं वन्देऽतिशान्ताकृतिं
वन्दे भक्तजनाश्रय च वरदं वन्दे शिव शङ्करम्॥ ३॥

वन्दे भूरथमम्बुजाक्ष-विशिखं वन्दे श्रुतीघोटकं
वन्दे शैलशरासनं फणिगुणं वन्देऽधितूणीरकम्।
वन्दे पद्मजसारथिं पुरहरं वन्दे महाभैरवं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥ ४॥

वन्दे पञ्चमुखाम्बुजं त्रिनयनं वन्दे ललाटेक्षणं
वन्दे व्योमगतं जटासुमुकुटं चन्द्रार्धगङ्गाधरम्।
वन्दे भस्मकृत-त्रिपुण्ड्रजटिलं वन्देऽष्टमूर्त्यात्मकं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥ ५॥

वन्दे कालहरं हरं विषधरं वन्दे मृडं धूर्जटिं
वन्दे सर्वगतं दयामृतनिधिं वन्दे नृसिंहापहम्।
वन्दे विप्र-सुरार्चितांघ्रि-कमलं वन्दे भगाक्षापहं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥ ६॥

वन्दे मङ्गलराजताद्रि-निलयं वन्दे सुराधीश्वरं
वन्दे शङ्करमप्रमेयमतुलं वन्दे यमद्वेषिणम्।
वंदे कुण्डलिराज-कुण्डलधरं वंदे सहस्राननं
वंदे भक्तजनाश्रयं च वरदं वंदे शिवं शङ्करम्॥ ७॥

वंदे हंसमतीन्द्रियं स्मरहरं वंदे विरूपेक्षणं
वंदे भूतगणेशमव्ययमहं वंदेऽर्थ-राज्य-प्रदम्।
वंदे सुंदर-सौरभेय-गमनं वंदे त्रिशूलायुधं
वंदे भक्तजनाश्रयं च वरदं वंदे शिवं शङ्करम्॥ ८॥

वंदे सूक्ष्ममनन्तमाद्यमभयं वंदेऽन्धकारापहं
वंदे रावण-नन्दि-भृंगि-विनतं वंदे सुपर्णावृतम्।
वंदे शैलसुतार्धभागवपुषं वंदे भयं त्र्यम्बकं
वंदे भक्तजनाश्रयं च वरदं वंदे शिवं शङ्करम्॥ ९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वंदे पावनमम्बरात्मविभवं वंदे महेन्द्रेश्वरं
वंदे भक्तजनाश्रयाभरतरुं वंदे नताभीष्टदम्।
वंदे जह्नुसुताम्बिकेशमनिशं वंदे गणाधीश्वरं
वंदे भक्तजनाश्रयं च वरदं वंदे शिवं शङ्करम्॥ १० ॥

☆

कल्किकृतं शिवस्तोत्रम्

गौरीनाथं विश्वनाथं शरण्यं भूतावासं वासुकीकण्ठभूषम्।
त्र्यक्षंरं पञ्चास्यादिदेवं पुराणं वंदे सांद्रानंदसंदोहदक्षम्॥ १ ॥
योगाधीशं कामनाशं करालं गङ्गासङ्ग-क्लिन्नमूर्धानमीशम्।
जटाजूटाटोपरिक्षिप्तभावं महाकालं चंद्रभालं नमामि॥ २ ॥
श्मशानस्थितं भूतवेतालसङ्गं नानाशस्त्रैः खड्गशूलादिभिश्च।
व्याघ्रात्युग्रा बाहवो लोकनाशे यस्य क्रोधोद्भूतलोकोऽस्तमेति॥ ३ ॥
यो भूतादिः पञ्चभूतैः सिसृक्षुस्तन्मात्रात्मा कालकर्मस्वभावैः।
प्रहृत्येदं प्राप्य जीवत्वमीशो ब्रह्मानन्दे क्रीडते तं नमामि॥ ४ ॥
स्थितौ विष्णुः सर्वजिष्णुः सुरात्मा लोकान् साधून् धर्मसेतून् बिभर्ति।
ब्रह्माद्यंशे योऽभिमानी गुणात्मा शब्दाद्यङ्गैस्तं परेशं नमामि॥ ५ ॥
यस्याज्ञया वायवो वान्ति लोके ज्वलत्यग्निः सविता याति तप्यन्।
शीतांशुः खे तारकासंग्रहश्च प्रवर्तन्ते तं परेशं प्रपद्ये॥ ६ ॥
यस्य श्वासात् सर्वधात्री धरित्री देवो वर्षत्यम्बुकालः प्रमाता।
मेरुर्मध्ये भुवनानां च भर्ता तमीशानं विश्वरूपं नमामि॥ ७ ॥

☆

हिमालयकृतं शिवस्तोत्रम्

त्वं ब्रह्मा सृष्टिकर्ता च त्वं विष्णुः परिपालकः।
त्वं शिवः शिवदोऽनन्तः सर्वमङ्गलकारकः॥ १ ॥
त्वमीश्वरो गुणातीतो ज्योतीरूपः सनातनः।
प्रकृतिः प्रकृतीशश्च प्राकृतः प्रकृतेः परः॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नानारूपविधाता त्वं भक्तानां ध्यानहेतवे।
येषु रूपेषु यत्प्रीतिस्तत्तद्रूपं बिभर्षि च॥ ३॥
सूर्यत्वं सृष्टिजनक त्वं आधारः सर्वतेजसाम्।
सोमस्त्वं सस्यपाता च सततं शीतरश्मिना॥ ४॥
वायुस्त्वं वरुणास्त्वं च विद्वांश्च विदुषां गुरुः।
मृत्युञ्जयो मृत्युमृत्यु कालकालो यमान्तकः॥ ५॥
वेदस्त्वं वेदकर्ता च वेदवेदाङ्गपारगः।
विदुषां जनकस्त्वं च विद्वांश्च विदुषां गुरुः॥ ६॥
मन्त्रस्त्वं हि जपस्त्वं हि तपस्त्वं सत्फलप्रदः।
वाक् त्वं रागाधिदेवी त्वं तत्कर्ता तद्गुरुः स्वयम्॥ ७॥
अहो सरस्वतीबीजं कस्त्वां स्तोतुमिहेश्वरः।
इत्येवमुक्त्वा शैलेन्द्रस्तस्थौ धृत्वा पदाम्बुजम्॥ ८॥
तत्रोवास तमाबोध्य चावरुह्य वृषाच्छिवः।
स्तोत्रमेतन्महापुण्यं त्रिसंध्यं यः पठेन्नरः॥ ९॥
मुच्यते सर्वपापेभ्यो भयेभ्यश्च भवार्णवे।
अपुत्रो लभते पुत्रं मासमेकं पठेद्यदि॥ १०॥
भार्याहीनो लभेद् भार्यां सुशीलां सुमनोहराम्।
चिरकालगंत वस्तु लभते सहसा ध्रुवम्॥ ११॥
राज्यभ्रष्टो लभेद्राज्यं शङ्करस्य प्रसादतः।
कारागारे श्मशाने च शत्रुग्रस्तेऽतिसङ्कटे॥ १२॥
गम्भीरेऽतिजलाकीर्णे भग्नपोते विषादने।
रणमध्ये महाभीते हिंस्रजन्तुसमन्विते।
सर्वतो मुच्यते स्तुत्वा शङ्करस्य प्रसादतः॥ १३॥

☆

विश्वमूर्त्यष्टकस्तोत्रम्

अकारणायाऽखिलकारणाय नमो महाकारणकारणाय।
नमोऽस्तु कालानल-लोचनाय कृतागसं मामव विश्वमूर्ते॥ १॥
नमोऽस्त्वहीनाभरणाय नित्यं नमः पशूनां पतये मृडाय।
वेदान्तवेद्याय नमो नमस्ते कृतागसं मामव विश्वमूर्ते॥ २॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमोऽस्तु भक्तेर्हितदानदात्रे सर्वौषधीनां पतये नमोऽस्तु।
ब्रह्मण्यदेवाय नमो नमस्ते कृतागसं मामव विश्वमूर्ते॥ ३॥
कालाय कालानलसन्निभाय हिरण्यगर्भाय नमो नमस्ते।
हालाहलादाय सदा नमस्ते कृतागसं मामव विश्वमूर्ते॥ ४॥
विरञ्चिनारायण-शक्रमुख्यैरज्ञातवीर्याय नमो नमस्ते।
सूक्ष्मातिसूक्ष्माय नमोऽघहन्त्रे कृतागसं मामव विश्वमूर्ते॥ ५॥
अनेककोटीन्दुनिभाय तेऽस्तु नमो गिरीणां पतयेऽघहन्त्रे।
नमोऽस्तु ते भक्तिविपद्धराय कृतागसं मामव विश्वमूर्ते॥ ६॥
सर्वान्तरस्थाय विशुद्धधाम्ने नमोऽस्तु ते दुष्टकुलान्तकाय।
समस्त-तेजोनिधये नमस्ते कृतागसं मामव विश्वमूर्ते॥ ७॥
यज्ञाय यज्ञादिफलप्रदात्रे यज्ञस्वरूपाय नमो नमस्ते।
नमो महानन्दमयाय नित्यं कृतागसं मामव विश्वमूर्ते॥ ८॥
इति स्तुतो महादेवो दक्षं प्राह कृताञ्जलिम्।
यत्तेऽभिलषितं दक्ष! तत्ते दास्याम्यहं ध्रुवम्॥ ९॥
अन्यच्च श्रृणु भो दक्ष यच्च किञ्चिद् ब्रवीम्यहम्।
यत्कृतं हि मम स्तोत्रं त्वया भक्त्या प्रजापते॥ १०॥
ये श्रद्धया पठिष्यन्ति मानवाः प्रत्यहं शुभम्।
निष्कल्मषा भविष्यन्ति सापराधा अपि ध्रुवम्॥ ११॥

☆

महामृत्युञ्जयध्यानम्

हस्ताम्भोज-युपस्थ-कुम्भयुगलादुद्धृत्य तोयं शिरः
सिञ्चन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ।
अक्ष-स्रग्-मृगहस्तमम्बुजगतं मूर्द्धस्थचन्द्रं स्रवत्
पीयूषोऽत्र तनुं भजे स-गिरिजं मृत्युञ्जयं त्र्यम्बकम्॥ १॥
चन्द्रोद्भासित-मूर्द्धजं सुरपतिं पीयूषपात्रं महद्
हस्ताब्जेन दधत् सुदिव्यममलं हास्यास्यपङ्केरुहम्।
सूर्येन्द्वग्नि-विलोचनं करतले पाशाक्षसूत्राङ्कुशा-
म्भोजं बिभ्रतमक्षयं पशुपतिं मृत्युञ्जयं संस्मरे॥ २॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्मर्त्तव्याखिललोकवर्त्ति सततं यज्जङ्गमस्थावरं
व्याप्तं येन च यत्प्रपञ्चविहितं मुक्तिश्च यत् सिद्धयति।
यद्वा स्यात् प्रणवत्रिभेदगहनं श्रुत्वा च यद् गीयते
तद्वस्तुस्थिति-सिद्धयेऽस्तु वरदं ज्योतिस्त्रयोत्थं महः ।। ३ ।।
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बंधनान् मृत्योर्मुक्षीय माऽमृतात् ।। ४ ।।
ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृतिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ।। ५ ।।

☆

शिवाष्टकम्

पुरारिः कमारिर्निखिल भयहारी पशुपति-
र्महेशो भूतेशो नगपतिसुतेशो नटपतिः।
कपाली यज्ञाली विबुधदलपाली सुरपतिः
सुराराध्यः शर्वो हरतु भवभीतिं भवपतिः ।। १ ।।
शये शूल भीमं दितिजभयदं शत्रुदलनं
गले मौण्ड्रीं मालां शिरसि च दधानः शशिकलाम्।
जटाजूटे गङ्गामघनिवहभङ्गां सुरनदीं
सुराराध्यः शर्वो हरतु भवभीतिं भवपतिः ।। २ ।।
भवो भर्गो भीमो भवभयहरो भालनयनो
वदान्यः सम्मान्यो मिखिलजन-सौजन्यनिलयः।
शरण्यो ब्रह्मण्यो विबुधगणगण्यो गुणनिधिः
सुराराध्यः शर्वो हरतु भवभीतिं भवपतिः ।। ३ ।।
त्वमेवेदं विश्वं सृजसि सकलं ब्रह्मवपुषा
तथा लोकान् सर्वानवसि हरिरूपेण नियतम्।
लयं लीलाधाम त्रिपुरहररूपेण कुरुषे
त्वदन्यो नो कश्चिज्जगति सकलेशोविजयते ।। ४ ।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा रज्जौ भानं भवति भुजगस्यान्धकरिपरा
तथा मिथ्याज्ञानं सकलविषयाणामिह भवे।
त्वमेकश्चित्सर्गं-स्थिति-लय-वितानं वितनुषे
भवेन्माया तत्र प्रकृतिपदवाच्या सहचरी॥ ५॥
प्रभो! साऽनिर्वाच्या चितिविरहिता विभ्रमकरी
तवच्छायापत्त्या सकलघटनामञ्चति सदा।
रथो यन्तुर्योगाद् व्रजति पदवीं निर्भयतया
तथवासौ कर्त्री त्वमसि शिव! साक्षी त्रिजगताम्॥ ६॥
नमामि त्वामीशं सकलसुखदातारमजरं
परेशं गौरीशं गणपतिसुतं वेदविदितम्।
वरेण्यं सर्वज्ञं भुजगवलयं विष्णुदयितं
गणाध्यक्षं दक्षं प्रणतजनतापार्त्तिहरणम्॥ ७॥
गुणातीतं शम्भुं बुधगणमुखोद्गीतयशसं
विरूपाक्षं देवं धनपतिसखं वेदविनुतम्।
विभुं नत्वा याचे भवतु भवतः श्रीचरणयो-
र्विशुद्धा सद्भक्तिः परमपुरुषस्यादिविदुषः॥ ८॥
शङ्करे यो मनः कृत्वा पठेच्छ्रीशङ्कराष्टकम्।
प्रीतस्तस्मै महादेवो ददाति सकलेप्सितम्॥ ९॥

☆

काशीविश्वेश्वरादिस्तोत्रम्

नमः श्रीविश्वनाथाय देववन्द्यपदाय ते।
काशीशेशावतारे मे देवदेव ह्युपादिश॥ १॥
मायाधीशं महात्मानं सर्वकारणकारणम्।
वंदे तं माधवं देवं यः काशीं चाऽधितिष्ठति॥ २॥
वन्दे तं धर्मगोप्तारं सर्वगुह्यार्थवेदिनम्।
गणदेवं ढुण्ढिराजं तं महान्तं स्वविघ्नहम्॥ ३॥
भारं वोढुं स्वभक्तानां यो योगं प्राप्त उत्तमम्।
तं स-ढुण्ढिं दण्डपाणिं वन्दे गङ्गातटस्थितम्॥ ४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भैरवं दंष्ट्राकरालं भक्ताभयकरं भजे ।
दुष्टदण्ड-शुलशीर्षधरं वामाध्वचारिणम् ।। ५ ।।
श्रीकाशीं पापशमनीं दमनीं दुष्टचेतसः ।
स्वनिःश्रेणिं चाविमुक्तपुरीं मर्त्यहितां भजे ।। ६ ।।
नमामि चतुराराध्यां सदाऽणिन्मि स्थितिं गुहाम् ।
श्रीगङ्गे भैरवीं दूरीकुरु कल्याणि यातनाम् ।। ७ ।।
भवानि रक्षाऽन्नपूर्णे सद्वर्णितगुणेऽम्बिके ।
देवर्षिवन्द्याम्बुमणिकर्णिकां मोक्षदां भजे ।। ८ ।।

☆

कालभैरवाष्टकम्

देवराज-सेव्यमान-पावनांघ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादि-योगिवृन्द-वन्दितं दिगम्बरं
काशिकापुराधिनाथकालभैरवं भजे ।। १ ।।
भानुकोटि-भास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमम्बुजाक्षशूलमक्षरं
काशिकापुराधिनाथकालभैरवं भजे ।। २ ।।
शूलटङ्कपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिकापुराधिनाथकालभैरवं भजे ।। ३ ।।
भक्ति-मुक्ति-दायकं प्रशस्तचारुविग्रहं
भक्तवत्सलं स्थितं समस्तलोकविग्रहम् ।
विनिक्वणन्-मनोज्ञ-हेमकिङ्किणी-लसत्कटिं
काशिकापुराधिनाथकालभैरवं भजे ।। ४ ।।
धर्मसेतुपालक त्वधर्ममार्गनाशकं
कर्मपाशमोचकं सुशर्मदायकं विभुम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वर्णवर्णशेषपाश-शोभिताङ्ग-मण्डलं
काशिकापुराधिनाथकालभैरवं भजे ॥ ५ ॥
रत्नपादुका- प्रभाभिराम- पादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरञ्जनम् ।
मृत्युदर्पनाशनं करालदंष्ट्रमोक्षणं
काशिकापुराधिनाथकालभैरवं भजे ॥ ६ ॥
अट्टहास- भिन्नपद्मजाण्डकोशसन्ततिं
दृष्टिपात-नष्टपाप-जालमुग्रशासनम् ।
अष्टसिद्धिदायकं कपालमालिकंधरं
काशिकापुराधिनाथ- कालभैरवं भजे ॥ ७ ॥
भूतसङ्घनायकं विशालकीर्तिदायकं
काशिवास-लोकपुण्य-पापशोधकं विभुम् ।
नीतिमार्गकोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथकालभैरवं भजे ॥ ८ ॥
कालभैरवाष्टकं पठन्ति ये मनोहरं
ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम् ।
शोक-मोह-दैन्यलोभ-कोपताप-नाशनं
प्रयान्ति कालभैरवांघ्रिसन्निधिं नरा ध्रुवम् ॥ ९ ॥

☆

शिवाष्टकम्

तस्मै नमः परमकारणकारणाय
दीप्तोज्ज्वलज्ज्वलितपिङ्गललोचनाय ।
नागेन्द्रहारकृतकुण्डलभूषणाय
ब्रह्मेन्द्रविष्णुवरदाय नमः शिवाय ॥ १ ॥
श्रीमत्प्रसन्नशशिपन्नगभूषणाय
शैलेन्द्रजावदनचुम्बितलोचनाय ।
कैलासमन्दरमहेन्द्रनिकेतनाय
लोकत्रयार्तिहरणाय नमः शिवाय ॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पद्मावदातमणिकुण्डलगोवृषाय
कृष्णागरुप्रचुरचन्दनचर्चिताय ।
रस्मानुषक्तविकचोत्पलमल्लिकाय
नीलाब्जकण्ठसदृशाय नमः शिवाय ॥ ३ ॥

लम्बत्सपिङ्गलजटामुकुटोत्कटाय
दंष्ट्राकरालविकटोत्कटभैरवाय ।
व्याघ्राजिनाम्बरधराय मनोहराय
त्रैलोक्यनाथनमिताय नमः शिवाय ॥ ४ ॥

दक्षप्रजापतिमहामखनाशनाय
क्षिप्रं महात्रिपुरदानवघातनाय ।
ब्रह्मोर्जितोर्ध्वगकरोटिनिकृन्तनाय
योगाय योगनमिताय नमः शिवाय ॥ ५ ॥

संसारसृष्टिघटनापरिवर्तनाय
रक्षःपिशाचगणसिद्धसमाकुलाय ।
सिद्धोरगग्रहगणेन्द्रनिषेविताय
शार्दूलचर्मवसनाय नमः शिवाय ॥ ६ ॥

भस्माङ्गरागकृतरूपमनोहराय
सौम्यावदातवनमाश्रितमाश्रिताय ।
गौरीकटाक्षनयनार्धनिरीक्षणाय
गोक्षीरधारधवलाय नमः शिवाय ॥ ७ ॥

आदित्यसोमवरुणानिलसेविताय
यज्ञाग्निहोत्रवरधूमनिकेतनाय ।
ऋक्सामवेदमुनिभिः स्तुतिसंयुताय
गोपाय गोपनमिताय नमः शिवाय ॥ ८ ॥

शिवाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ९ ॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उमामहेश्वरस्तोत्रम्

नमः शिवाभ्यां नव-यौवनाभ्यां परस्पराश्लिष्ट-वपुर्धराभ्याम्।
नगेन्द्रकन्या-वृषकेतनाभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ १॥

नमः शिवाभ्यां सरसोत्सवाभ्यां नमस्कृताभीष्टवरप्रदाभ्याम्।
नारायणेनार्चित-पादुकाभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ २॥

नमः शिवाभ्यां वृषवाहनाभ्यां विरिञ्चि-विष्णिवन्द्र-सुपूजिताभ्याम्।
विभूतिपाटीर-विलेपनाभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ ३॥

नमः शिवाभ्यां जगदीश्वराभ्यां जगत्पतिभ्यां जयविग्रहाभ्याम्।
जम्भारिमुख्यैरभिवन्दिताभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ ४॥

नमः शिवाभ्यां परमौषधाभ्यां पञ्चाक्षरी-पञ्जर-रञ्जिताभ्याम्।
प्रपञ्च-सृष्टि-स्थिति-संहृतिभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ ५॥

नमः शिवाभ्यामतिसुन्दराभ्यामत्यन्तमासक्त-हृदयमम्बुजायाम्।
अशेषलोकैक-हितङ्कराभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ ६॥

नमः शिवाभ्यां कलिनाशनाभ्यां कङ्कालकल्याणवपुर्धराभ्याम्।
कैलासशैलस्थितदेवताभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ ७॥

नमः शिवाभ्यामशुभापहाभ्यामशेष-लोकैक-विशेषिताभ्याम्।
अकुण्ठिताभ्यां स्मृतिसम्भृताभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्। ८॥

नमः शिवाभ्यां रथवाहनभ्यां रवीन्दु-वैश्वानर-लोचनाभ्याम्।
राकाशशाङ्काभ-मुखाम्बुजाभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ ९॥

नमः शिवाभ्यां जटिलन्धराभ्यां जरा-मृतिभ्यां च विवर्जिताभ्याम्।
जनार्दनाब्जोद्भ-पूजिताभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ १०॥

नमः शिवाभ्यां विषमेक्षणाभ्यां बिल्वच्छदामल्लिकदामभृद्भ्याम्।
शोभावती-शान्तवतीश्वराभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ ११॥

नमः शिवाभ्यां पशुपालकाभ्यां जगत्त्रयीरक्षणबद्धहृद्भ्याम्।
समस्त-देवासुर-पूजिताभ्यां नमो नमः शङ्कर-पार्वतीभ्याम्॥ १२॥

स्तोत्रं त्रिसन्ध्यं शिवपार्वतीयं भक्त्या पठेद् द्वादशकं नरो यः।
स सर्वसौभाग्यफलानि भुङ्क्ते शतायुर्रतेशिवलोकमेति॥ १३॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टमूर्तिस्तोत्रम्

ध्यानम्

ध्यायेन्नित्यं महेशं रजत-गिरिनिभं चारुचन्द्रावतंसम्
रत्नाकल्पोज्ज्वलाङ्गं परशु-मृग-वरा-भीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥

ईशा वास्यमिदं सर्वं चक्षुषो सूर्यो अजायत।
इति श्रुतिरुवाचातो महादेवः परावरः॥ १॥

अष्टमूर्तेरसौ सूर्यो मूर्तित्वे परिकल्पितः।
नेत्रत्रिलोचनस्यैकमसौ सूर्यस्तदाश्रितः॥ २॥

यस्य भाषा सर्वमिदं विभातीति श्रुतिरिमे।
तमेव भान्तमीशानमनुभान्ति खगादयः॥ ३॥

ईशानः सर्वविद्यानां भूतानां चेति च श्रुतेः।
वेदादिनामप्यधीशः स ब्रह्मा कैर्न पूज्यते॥ ४॥

यस्य संहारकाले तु न किञ्चिदवशिष्यते।
सृष्टिकाले पुनः सर्वं स एकः सृजति प्रभुः॥ ५॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
इति श्रुतेर्महादेवः श्रेष्ठोर्यः सकलाश्रितः॥ ६॥

विश्वं भूतं भवद्भव्यं सर्वं रुद्रात्मकं श्रुतम्।
मृत्युञ्जयस्तारकोऽतः स यज्ञस्य प्रसाधनः॥ ७॥

विषमाक्षोऽपि समदृक् सशिवोऽपि शिवः स च।
वषसंस्थोऽप्यतिवृषो गुणात्माऽप्यगुणोऽमलः॥ ८॥

यदाज्ञामुद्वहन्त्यत्र शिरसा साऽसुराः सुराः।
अन्नं वातो वष इतीषवोयस्य स विश्वापाः॥ ९॥

भिषक्तमं त्वा भिषजां श्रृणोमीति श्रुतेरयम्।
स्वभक्त-संसारमहा-रोगहर्ताऽपि शङ्करः॥ १०॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भगवान् शंकर

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नाममि ॥

☆

भगवान् गङ्गाधर

ॐ जय गंगाधर जय हर जय गिरिजाधीशा।
त्वं मां पालय नित्यं कृपया जगदीशा ॥ १ ॥हर हर हर० महादेव ॥
कैलासे गिरिशिखरे कल्पद्रुमविपिने।
गुञ्जति मधुकरपुञ्जे कुञ्जवने गहने ॥
कोकिलकूंजित खेलतहंसावन ललिता।
रचयति कलाकलापं नृत्यति मुदसहिता ॥ २ ॥हर० ॥
तस्मिंल्ललितसुदेशे शाला मणिरचिता।
तन्मध्ये हरनिकटे गौरी मुदसहिता ॥
क्रीडा रचयति भूषारञ्जित निजमीशम्।
इन्द्रादिक सुर सेवत नामयते शीशम् ॥ ३ ॥हर० ॥
विबुधबधू बहु नृत्यत हृदये मुदसहिता।
किन्नर गायन कुरुते सप्त-स्वर सहिता ॥
धिनकत थै थै धिनकत मृदंग वादयते।
क्वण क्वण ललिता वेणु मधुरं नाटयते ॥ ४ ॥हर० ॥
रुण रुण चरणे रचयति नूपुर-मुज्ज्वलिता।
चक्रावर्ते भ्रमयति कुरुते तां धिक तां ॥
तां तां लुप चुप तां तां डमरू वादयते।
अङ्गुष्ठाङ्गुलिनादं लासकतां कुरुते ॥ ५ ॥हर० ॥
कर्पूराद्युतिगौरं पञ्चाननसहितम्।
त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम् ॥
सुन्दरजटाकलापं पावकयुतभालम्।
डमरुत्रिशूल पिनाकं करधृत-नर-कपालम् ॥ ६ ॥हर० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्प रचयति मालां पन्नगमुपवीतम्।
वामविभागे गिरिजारूपं अतिललितम्॥
सुन्दरसकलशरीरे कृतभस्माभरणम्।
इति बृषभध्वजरूपं तापत्रयहरणम्॥ ७ ॥हर० ॥
शङ्खनिनादं कृत्वा झल्लरि नादयते।
नीराजयते ब्रह्मा वेदऋचां पठते॥
अतिमृदुचरणसरोजं हृत्कमले धृत्वा।
अवलोकयति महेशं ईशं अभिनत्वा॥ ८ ॥हर० ॥
ध्यानं आरति समये हृदये अति कृत्वा।
रामस्त्रिजटानाथं ईशं अभिनत्वा॥
संगितमेवं प्रतिदिन पठनं यः कुरुते।
शिवसायुज्यं गच्छति भक्त्या यः श्रृणुते॥ ९ ॥हर० ॥

☆

भगवान् महादेव

हर हर हर महादेव !
सत्य, सनातन, सुन्दर, शिव ! सबके स्वामी।
अविकारी, अविनाशी, अज्ञ, अन्तर्यामी॥ १ ॥ हर हर० ॥
आदि, अनन्त, अनामय, अकल, कलाधारी।
अमल-अरूप, अगोचर, अविचल, अघहारी॥ २ ॥ हर हर० ॥
ब्रह्मा, विष्णु, महेश्वर, तुम त्रिमूर्तिधारी।
कर्ता, भर्ता, धर्ता तुम ही संहारी॥ 3 ॥ हर हर० ॥
रक्षक, भक्षक, प्रेरक, प्रिय औढरदानी।
साक्षी, परम अकर्ता, कर्ता, अभिमानी॥ ४ ॥ हर हर० ॥
मणिमय-भवन निवासी, अति भोगी, रागी।
सदा श्मशान विहारी, योगी, वैरागी॥ ५ ॥ हर हर० ॥
छाल-कपाल, गरल-गल, मुण्डमाल, व्याली।
चिताभस्मतन, त्रिनयन, अयनमहाकाली॥ ६ ॥ हर हर० ॥
प्रेत-पिशाच-सुसेवित, पीतजटाधारी।
विवसन विकट रूपधर रुद्र प्रलयकारी॥ ७ ॥ हर हर० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुभ्र, सौम्य, सुरसरिधर, शशिधर, सुखकारी।
अतिकमनीय, शान्तिकर, शिवमुनि-मन हारी॥ ८॥ हर हर०॥
निर्गुण, सगुण, निरञ्जन, जगमय, नित्य प्रभो।
कालरूप केवल हर! कालातीत विभो॥ ९॥ हर हर०॥
सत्, चित्, आनँद, रसमय करुणामय धाता।
प्रेम-सुधा-निधि, प्रियतम, अखिल विश्व-त्राता॥ १०॥ हर हर०॥
हम अतिदीन, दयामय! चरण-शरण दीजै।
सब विधि निर्मल मति कर अपना करि लीजै॥ ११॥ हर हर०॥

☆

भगवान् श्रीशंकर

जयति जयति जग-निवास, संकर सुखकारी॥
अजर अमर अज अरूप, सत चित आनंदरूप,
व्यापक ब्रह्मस्वरूप, भव! भव-भय-हारी॥ जयति०॥
शोभित बिधुबाला, भाल, सुरसरिमय जटाजाल,।
तीन नयन अति विशाल, मदन-दहन-कारी॥ जयति०॥
भक्तहेतु धरत शूल, करत कठिन शूल फूल,
हिय की सब हरत हूल अचल शान्तिकारी॥ जयति०॥
अमल अरुण चरणकमल सफल करत काम सकल,
भक्ति-मुक्ति देत विमल, माया-भ्रम-टारी॥ जयति०॥
कार्तिकेययुत गणेश, हिमतनया सह महेश,
राजत कैलास-देश, अकल कलाधारी॥ जयति०॥
भूषण तन भूति व्याल, मुण्डमाल कर कपाल,
सिंह-चर्म हस्ति-खाल, डमरू कर धारी॥ जयति०॥
अशरण जन नित्य शरण, आशुतोष आरतिहरण,
सब विधि कल्याण-करण जय जय त्रिपुरारी॥ जयति०॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भगवान् कैलासवासी

शीश गंग अर्धंग पार्वती सदा विराजत कैलासी।
नंदी भृंगी नृत्य करत हैं, धरत ध्यान सुर सुखरासी॥
शीतल मन्द सुगन्ध पवन बह बैठे हैं शिव अविनाशी।
करत गान-गन्धर्व सप्त स्वर राग रागिनी मधुरासी॥
यक्ष-रक्ष-भैरव जहँ डोलत, बोलत है वन के वासी,
कोयल शब्द सुनावत सुन्दर, भ्रमर करत है गुंजासी॥
कल्पद्रुम अरु पारिजात तरु लाग रहे हैं लक्षासी।
कामधेनु कोटिन जहँ डोलत करत दुग्धकी वर्षा-सी॥
सूर्यकान्त सम पर्वत शोभित, चन्द्रकान्त सम हिमराशी।
नित्य छहों ऋतु रहत सुशोभित सेवत सदा प्रकृति-दासी॥
ऋषि मुनि देव दनुज नित सेवत, गान करत श्रुति गुणराशी।
ब्रह्मा-विष्णु निहारत निसिदिन कछु शिव हमकूँ फरमासी॥
ऋद्धि सिद्धि के दाता शंकर नित सत् चित् आनँदराशी।
जिनके सुमिरत ही कट जाती कठिन काल-यम की फाँसी॥
त्रिशूलधरजी का नाम निरंतर प्रेम सहित जो नर गासी।
दूर होय विपदा उस नरकी जन्म-जन्म शिवपद पासी॥
कैलासी काशी के वासी अविनासी मेरी सुधि लीजो।
सेवक जान सदा चरनन को अपनो जान कृपा कीजो॥
तुम तो प्रभुजी सदा दयामय अवगुण मेरे सब ढकियो।
सब अपराध क्षमा कर शंकर किंकर की विनती सुनियो॥

☆

भगवान् शिवशंकर

हरि कर दीपक, बजावें संख सुरपति,
गनपति झाँझ, भैरो झालर झरत हैं।
नारद के कर बीन, सारदा गावत जस,
चारिमुख चारिवेद विधि उचरत हैं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षटमुख रटत सहस्त्रमुख सिव सिव,
सनक-सनंदनादि पाँयन परत हैं।
फूलचन्द तीनि लोक, तीस और तीनि कोटि,
एते शिव-संकर की आरती करत हैं॥

☆

श्री शिव चालीसा

जै गणेश गिरजा सुवन, मंगल मूल सुजान।
कहत फूल हे देव तुम, देओ अभय वरदान॥

जय गिरिजापति दीन दयाला। सदा करत संतन प्रतिपाला॥
भाल चन्द्रमा सोहत नीके। कानन कुण्डल नागफनी के॥
अङ्ग गौर शिश गंग बहाये। मुण्डमाल तन छार लगाये॥
वस्त्र खाल बाघम्बर सोहैं। छवि को देख नाग मुनि मोहैं॥
मैना मातु की हवे दुलारी। बाम अङ्ग सोहत छवि न्यारी॥
कर त्रिशूल सोहत छवि भारी। करत सदा शत्रुन् क्षयकारी॥
नन्दिगणेश सोहैं तहँ कैसे। सागर मध्य कमल हैं जैसे॥
कार्तिक श्याम और गणराऊ। या छबि को कहि जात न काऊ॥
देवन जबहीं जाय पुकारा। तबही दुख प्रभु आप निवारा॥
किया उपद्रव तारक भारी। देवन सब मिलि तुमहिं जुहारी॥
तुरत षडानन आप पठायउ। लव निमेष महँ मारि गिरायउ॥
आप जलंधर असुर संहारा। सुयश तुम्हार विदित संसारा॥
त्रिपुरासुर सन युद्ध मचाई। सबहिं कृपाकर लीन बचाई॥
किया तपहिं भागीरथ भारी। पुरब प्रतिज्ञा तासु पुरारी॥
दानिन महँ तुम सम कोउ नाहीं। सेवक अस्तुति करत सदा ही॥
वेद नाम महिमा तब गाई। अकथ अनादि भेद नहिं पाई॥
प्रगट उदधि मंथन में ज्वाला। जरे सुरासुर भये विहाला॥
कीन्ह दया तहँ करी सहाई। नीलकण्ठ तब नाम कहाई॥
पूजन रामचन्द्र जब कीन्हा। जीत के लंक विभीषण दीन्हा॥
सहस्त्र कमल में हो रहे धारी। कीन्ह परीक्षा तबहिं पुरारी॥
एक कमल प्रभु राखेउ जोई। कमल नयन पूंजन चह सोई॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कठिन भक्ति देखी प्रभु शंकर। भये प्रसन्न दिये इच्छित वर॥
जय जय जय अनंत अविनासी। करत कृपा सब के घटवासी॥
दुष्ट सकल नित मोंहि सतावै। भ्रमत रहे मोंहि चैन न आवै॥
त्राहि-त्राहि मैं नाथ पुकारो। यह अवसर मोहि आन उबारो॥
लै त्रिशूल शत्रुन् को मारो। संकट से मोहि आनि उबारो॥
मातु पिता भ्राता सब होई। संकट में पूछत नहिं कोई॥
स्वामि एक है आस तुम्हारी। आय हरहु अब संकट भारी॥
धन निरधन को देत सदा हीं। जो कोइ जाचे वो फल पाहीं॥
अस्तुति केहि विधि करौं तुम्हारी। क्षमहु नाथ अब चूक हमारी॥
शंकर हो संकट के नाशन। विघ्न विनाशन मंगल कारन॥
योगि यती मुनि ध्यान लगावैं। शारद नारद शीश नवावैं॥
नमो नमो जै नमः शिवाय। सुर ब्रह्मादिक पार न पाय॥
जो यह पाठ करै मन लाई। तापर होत हैं शंभु सहाई॥
ऋनिया जो कोई हो अधिकारी। पाठ करे सो पावन हारी॥
पुत्र होन कर इच्छा कोई। निश्चय शिव प्रसाद तेहि होई॥
पंडित त्रयोदशी को लावे। ध्यान-पूर्वक होम करावे॥
त्रयोदशी व्रत करै हमेशा। तन नहिं ताके रहै कलेशा॥
धूप दीप नैवेद्य चढ़ावै। शङ्कर सन्मुख पाठ सुनावै॥
जन्म-जन्म के पाप नसावै। अन्त बास शिवपुर में पावै॥
कहे फूल है आस तुम्हारी। जानि सकल दुख हरहु हमारी॥

नित्तनियम करि जो प्रात ही, पाठ करे चालीस।
तुम उसकी मन कामना, पूर्ण करत जगदीश॥

☆

श्री शिव स्तुति

श्री गिरिजापति बंदिकर, चरण मध्य शिर नाय।
कहत फूल हे देव तुम मोपर होहु सहाय॥

नन्दी की सबारी नाग अंगीकार धारी नित संत सुखकारी नीलकण्ठ
त्रिपुरारी हैं। गले मुण्डमाला भारी सिर सोहे जटाधारी वाम अंग

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विहारी गिरिराज की कुमारी हैं।। दानी लाख भारी शेष शारदा पुकारी काशीपति मदनारी कर शूल चक्रधारी हैं। कला उजियारी लख देव सो निहारी यश गावैं वेद चारी सो हमारी रखवारी हैं।। शंभु बैठे हैं विशाला सब अङ्ग हो निहाला पिव भंग मतवाला अहि अंग पै चढ़ाये हैं। गले सोहै मुण्डमाला कर डमरू विशाला अरु ओढ़े मृगछाला भस्म अंग में लगाये हैं।। संग सुरभीसुतशाला करै भक्त प्रतिपाला मृत्यु हरै अकाला जटा शीश मो बढ़ाये हैं। कहे रामलाला मोहि करौ तुम निहाला गिरजापति भोला जैसे काम को जलाये हैं।। मारा है जलंधर औ त्रिपुरा सँहारा जिन जारा है काम जाके शीश गंग धारा है। धारा है अपार जासु महिमा है तीनलोक भाल सोहै इन्दु जाके सुखमा की सारा है।। सारा है बात सब खाया है हलाहल जानि भक्त के आधारा जाहि वेदन उचारा है। चारा है भाग जाके द्वार है गिरीश कन्या कहत फूल सोई मालिक हमारा है। अष्ट गुरुज्ञानी जाके मुख वेदवानी भवन में भवानी सुख संपति लहा करै। मुण्डन के माला जाके चंद्रमा ललाट सोहै दासन के दास जाके दारिद दहा करै।। चारों द्वार बन्दी जाके द्वारपाल नन्दी कहत कवि अनन्दी नर नाहक हहा करैं। जगत रिसाय यमराज को कहा बसाय शंकर सहाय तो भयंकरा कहा करैं।। गौर शरीर में गौरी विराजत मौर जटा शिर सोहत जाके। नागन को उपवीत लसे ये फूल कहै शशिभाल में वाके।। दान करै पल में फल चारि और टारत अङ्क लिखे विधना के। शंकर नाम निशंक सदाहि भरोसे रहें निशिवासर ताके।।

☆

शिव-लीला

कल्याणकारी शिव

कासी के बसैया परकासी के दिबैया नाथ,
भंग के छनैया अरु गंग के धरैया तुम।
बेस के अमंगल औ जंगल के वासी प्रभु,
तौहू महामंगल हो मंगल करैया तुम।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केतिक उधारे केते तारे भवसागर तें,
केतिक सम्हारे ऐसे बिपद-हरैया तुम।
एहो त्रिपुरारी अघहारी सुखकारी शिव,
'फूल' परयौभुद्वारै आज लाज के रखैया तुम॥

☆

अद्भुत शिव

सती के गहैया 'फूल' सती के छँड़ैया जोगी,
काम के बचैया पूरे काम के नसैया तुम।
जग के भरैया शिव जग के हरैया काल,
पशुपति-गहैया पाशुपात-चलैया तुम॥
औघड़-दिवैया दानी औघड़-छलैया मस्त,
औघड़ कहैया खासे औघड़ नचैया तुम।
सूल के धरैया रखवारी के करैया प्रभो,
लाज के रखैया आज लाज के रखैया तुम॥

☆

अलबेला शिव

माथे में त्रिपुण्ड विधुभाल है विराजै 'फूल',
जटन के बीच गंगाधार को झमेला है।
सींगी कर राजै एक करमे त्रिसूल धारे,
गरे मुंडमाल घाले कांधे नाग सेला है॥
कटि बाघछाला बाँधे भसम रमाये तन,
बाम अंग गौरी देवी चढ़न को बैला है।
धेला है न पल्ले, खरचीला है अजुबी भाँति,
ऐसा गिरिमेला देव संभू अलबेला है॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भक्तरक्षक शिव

सोच विमोच अनेक लये जस गान सुन्यौं शिव तैं सुजसी है।
देवन में गुरुदेव तुही प्रभु तेरी ही चित्त में गाँस गँसी है॥
ओ सिरताज चराचर के! तव प्रेम में 'फूल' की फाँस फँसी है।
लाजु बचा कित्तो देखुतौइतै, अब मेरी किधौं तेरी हँसी है॥

☆

शिवस्तुति

क्रतुकर! शम्भो! क्रतुकर! अगजामित्र! प्रभो! गजामित्र!।
योगिञ्जयतु वियोगिन्! कर! पालक! हर! विचित्र वैचित्र्य!॥

अष्ट विभूति-विभूषित होकर काहेको अँग में भूति रमाई।
थी करनी गिरिजा गृहिणी फिर काहे मनोज की देह जलाई॥
भोले कहो तो दिगम्बर होकर कैसे पिनाक से प्रीति बढ़ाई।
मुण्ड की माल अपूत गले धर क्यों पुनि सीस पै गंग चढ़ाई॥ १॥
होके असंग भुजंग को संगम मंगल अंग अमंगल धूलीं।
त्याग सुधा विष पान कियो अरु-भंग-धतूर चबावत फूली॥
भक्त के तीनहु शूल समूल हरो हर! क्यों फिर आप त्रिशूली।
माँगहु भीख महेश्वर होकर क्यों मति भोलेजी! आपकी भूली॥ २॥
नाम त्रिलोचन, हो समलोचन, है भवनाम, करो भवहानी।
नाम है शूली, न शूल है एकहु, नाम असंग है, संग भवानी॥
नाम है कामहा कामप्रपूर हो, नाम के हो हर, काम के दानी।
नाम के और हो, काम के और हो, भोले! तुम्हारी विचित्र कहानी॥ ३॥
शंकर नाम, भयंकर दुष्ट को, नाम के भीम, तथा भयहारी।
नाम के शर्व सभी जग पालक, हो पररक्षक, नाम पुरारी॥
नाम पशूपति, हो पुरुषोत्तम, रुद्र हो, दुःखित वाष्पनिवारी।
अष्टस्वरूप, अनष्टस्वरूप' हो, भोले! विचित्र है बात तुम्हारी॥ ४॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तव

ताण्डव से त्रिभुवन-भरको
हे कम्पित करने वाले !
हे काल-रूप ! हे भैरव
मद-मत्सर हरने वाले !
कैलाश-गुफा के वासी !
हे चद्र-चूड़ प्रलयंकर !
हे अन्तक ! हे अविनासी !
संन्यासी उग्र भयंकर !

हे आदि सत्य करुणामय, हे मदन-मान-मद-भंजन !
तेरे पवित्र चरणों में मैं करता हूँ अभिवादन।

नागेन्द्रहार मृत्युञ्जय।
हे आशुतोष अखिलेश्वर।
गरलाभिराम गंगाधार।
हे सुखद सर्व सम्पत् कर।
शितिकण्ठ रुद्र भूताधिप
निर्दोष निरीह दिगम्बर।
धृतपाणी पिनाक सनातन।
त्रिविलोचन विश्व-धुरन्धर।

निर्लोभि निरंकुश निर्गुण, हे देव अपावन-पावन !
तेरे पवित्र चरणों में मैं करता हूँ अभिवादन॥

प्रज्वलित चिताओं पर के
हे निर्भय मुक्त विहारी।
सुर-श्रेष्ठ, वेद-अभिवंदित।
हे पूर्णरूप त्रिपुरारी।
हे भक्ति-मुक्ति फलदायक।
सम्पूज्यमान गत-कलिमल।
हे धर्मसेतु-परिपालक।
ज्योतिर्मय, चन्द्रकलोज्ज्वल !

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हे कालातीत सदाशिव, तेजस्वी वीर तपोधन!
तेरे पवित्र चरणों में मैं करता हूँ अभिवादन।

☆

हर हर हर

वसत अचल पर धवल बरन हर,
' सरप लसत अँग गँग शशधर सर।
जलज-नयन गर गरल अमल धर,
धरत चरम गज भजत धनद कर॥
करज कमल सज रजत बंदन रज,
बरद वदत भल सहज वचन वर।
दरस करत सब चढ़त अछत जल,
महत मनन धन कह हर हर हर॥ १॥
जरत सकल जग गरल धरत गल,
करत अभय भय जय कह जय कर।
तपत करम तप तन मन जरजर,
छनक न भल रह जनम जनम जर॥
जय तप मरव सत धरम अगम फल,
महत सहज जन वदत वरद वर।
सरबस अघनस घर-भर धन जन,
रह न तनक डर कह हर हर हर॥ २॥

☆

शंकर की कृपा

जिनके दिगम्बर बिराजता है अद्वितीय,
भूषित-विभूति-वर्ण सुन्दर कपूर-से।
बाँयी ओर जिनके हैं गिरिजा विराजमान,
काल कूट पीते फल खाते जो धतुर के॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अंग-अंग लिपटे भुजंग जटा-जूट-मध्य, गंग की
तरंगे लहराती अति दूर से॥
ऐसे शिवशंकर-कृपा की एक कोर मुझे, कोटिगुना
कीमती है कोटि 'कोहिनूर' से॥

☆

शिव-भक्ति का फल

कौऊ बिरोधी सामने न आवै न सतावै कोऊ,
जतन बिना बिपति सारी भारी भंगि जाय।
जाँचे बिना ऋद्धि-सिद्ध द्वार पर ठाढ़ी रहैं,
आपै आप आइकै रमाहू प्रेम पगि जाय।
हाथी-रथ-घोड़ा की सवारी अधिकारी रहैं,
पोतन और नाती ते पूरो भाग जगि जाय।
काहू बात की कमी रहै कहुँ न 'फूल' कवि,
जोपै साँची लगन दिगम्बर ते लगि जाय॥
बाहर और भीतर कलंक को रहै न नावँ,
भारी तेहू भारी पापराशि आपै जरि जाय।
धर्मराज दूर ही ते ठाढ़े ह्वै करैं प्रनाम,
देखत ही कालहूँ की हुलिया बिगरी जाय।
दान अरु धर्म के बिना ही जप तप ध्यान—
धारणा के 'फूल' निज जनम सुधरि जाय।
तीनौ ताप पास में न आवै कहूं शंकर की—
जोपै साँची प्रीति हिय माँहिं घर करि जाय।

☆

शंकर

'शंकर' नाम सुधासम है भव-भूति भरै भव-भावन शंकर।
शंकर-हेतु तजै यति धामहु शंकर पावत मार अशंकर॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शंकर ही जन-शंकर है पुनि काल भयंकर लोकवशंकर।
शंकर को सब देव भजै 'फूल' कवि-किंकर के शिवशंकर ।।

☆

श्री हरिहर साम्यवर्णन

उनते कढ़ी है गंग, इनते बढ़ी गंग, वे हैं जो मुरारी तो पुरारी ए कहावै हैं,
उनके रमा है संग, इनके उमा है संग, उतै साँप-सेज, इते साँप लपटावैं हैं।
नंद-गोद राजै वह, नंदि-पीठ राजै यह, सीस चंद छावै, चंद सीस पै चढ़ावै हैं।
पाप के हरैया हरि, ताप के हरैया हर, एक हैं, कहावैं, दोय भक्तन को भावैं हैं ।।

☆

फल

दरस किए तें दुख-दारिद दलत, पाँय
परस किए तें पाप-पूँज हरि लेत है।
जलके चढ़ाएँ जम-यातना न पाएँ कहूं,
चंदन चढ़ाएँ चित चौगुनो सचेंत है।।
कहत 'फूल' कुंद कुसुम कनीर कंज,
कनक चढ़ाएँ देत कनक-निकेत है।
त्रिदल चढ़ाएँ ते त्रिलोचन त्रिपान को,
त्रिगुनी त्रिबेनी की तरंगै करि देत है।।

☆

श्रीकनकधारास्तोत्रम्

वन्दे वन्दारु-मन्दार-मिन्दिरानन्द-कन्दलम्।
अमन्दानन्द-सन्दोह-बन्धुरं सिन्धुराननम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अङ्गं हरेः पुलक-भूषणमाश्रयन्ती
भृङ्गाङ्गनेव मुकुलाभरणं तमालम्।
अङ्गीकृता-ऽखिल-विभूतिरपाङ्गलीला
माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः। १॥

मुग्धा मुहुर्विदधती वदने मुरारेः
प्रेमत्रपा-प्रणिहितानि गताऽऽगतानि।
माला-दृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागर-सम्भवायाः॥ २॥

विश्वामरेन्द्र-पदविभ्रम-दानदक्ष-
मानन्द-हेतुरधिकं मुर-विद्विषोऽपि।
ईषन्निषीदतु मयि क्षणमीक्षणार्ध
मिन्दीवरोदर-सहोदरमिण्दिरायाः ॥ ३॥

आमीलिताक्ष-मधिगम्य मुदा मुकुन्द-
मानन्द-कन्दमनिमेष-मनङ्ग-तन्त्रम ।
आकेकर-स्थित-कनीनिक-पक्ष्मनेत्रं
भूत्यै भवेन्मम भुजङ्ग-शयाङ्गनायाः॥ ४॥

बाह्वन्तरे मुरजितः श्रितकोस्तुभे या
हारावलीव हरिनीलमयी विभाति।
कामप्रदा भगवतोऽपि कटाक्षमाला
कल्याणमावहतु मे कमलालयायाः॥ ५॥

कलाम्बुदालि-ललितोरसि कैटभारे-
र्धाराधरे स्फुरति या तडिदङ्गनेव।
मातुः समस्तजगतां महनीयमूर्ति-
र्भद्राणि मे दिशतु भार्गव-नन्दनायाः॥ ६॥

प्राप्तं पदं प्रथमतः खलु यत् प्रभावात्
माङ्गल्यभाजि मधु-माथिनि मन्मथेन।
मय्यापतेत् तदिह मन्थर-मीक्षणार्धं
मन्दाऽलसं च मकरालय-कन्यकायाः॥ ७॥

दद्याद् दयानुपवनो द्रविणाम्बुधारा-
मस्मिन्न किञ्चन-विहङ्गशिशौ विषण्णे।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुष्कर्म-धर्ममपनीय चिराय दूरं
नारायण-प्रणयिनी-नयनाम्बुवाहः ॥ ८ ॥
इष्टा-विशिष्ट-मतयोऽपि यया दयार्द्र-
दृष्टया त्रिविष्टपपदं सुलभं भजन्ते।
दृष्टिः प्रहृष्ट-कमलोदर-दीप्तिरिष्टां
पुष्टिं कृषीष्ट मम पुष्कर-विष्टरायाः ॥ ९ ॥
गीर्देवतेति गरुडध्वज-सुन्दरीति
शाकम्भरीति शशिशेखर-वल्लभेति।
सृष्टि-स्थिति-प्रलय-केलिषु संस्थिता या
तस्यै नमस्त्रिभुवनैक-गुरोस्तरुण्यै ॥ १० ॥
श्रुत्यै नमोऽस्तु शुभकर्म-फलप्रसूत्यै
रत्यै नमोऽस्तु रमणीय-गुणार्णवायै।
शक्त्यै नमोऽस्तु शतपत्र-निकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तम-वल्लभायै ॥ ११ ॥
नमोऽस्तु नालीक-निभाननायै
नमोऽस्तु दुग्धोदधि-जन्मभूम्यै।
नमोऽस्तु सोमामृत-सोदरायै
नमोऽस्तु नारायण-वल्लभायै ॥ १२ ॥
नमोऽस्तु हेमाम्बुज-पीठिकायै
नमोऽस्तु भूमण्डलनायिकायै।
नमोऽस्तु देवादि-दयापरायै
नमोऽस्तु शार्ङ्गायुध-वल्लभायै ॥ १३ ॥
नमोऽस्तु देव्यै भृगुनन्दनायै
नमोऽस्तु विष्णोरुरसि स्थितायै।
नमोऽस्तु लक्ष्म्यै कमलालयायै
नमोऽस्तु दामोदरवल्लभायै ॥ १४ ॥
नमोऽस्तु कान्त्यै कमलेक्षणायै
नमोऽस्तु भूत्यै भुवनप्रसूत्यै।
नमोऽस्तु देवादिभिरर्चितायै
नमोऽस्तु नन्दात्मज-वल्लभायै ॥ १५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सम्पत्कराणि सकलेन्द्रिय-नन्दनानि
साम्राज्य-दान-निरतानि सरोरुहाक्षि ।
त्वद्-वन्दनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयन्तु मान्ये ॥ १६ ॥

यत्कटाक्ष-समुपासनाविधिः
सेवकस्य सकलार्थसम्पदः ।
सन्तनोति वचनाङ्गमानसै-
स्त्वां मुरारि-हृदयेश्वरीं भजे ॥ १७ ॥

सरसिजनयने ! सरोजहस्ते !
धवलतमांशुक-गन्ध-माल्यशोभे ।
भगवति हरिवल्लभे ! मनोज्ञे !
त्रिभुवन-भूतिकरि ! प्रसीद मह्यम् ॥ १८ ॥

दिग्घस्तिभिः कनक-कुम्भ-मुखावसृष्ट-
स्वर्वाहिनी-विमल-चारुजल-प्लुताङ्गीम् ।
प्रातर्नमामि जगतां जननीमशेष-
लोकाधिनाथ-गृहिणीममृताब्धि-पुत्रीम् ॥ १९ ॥

कमले ! कमलाक्षवल्लभे !
त्वं करुणापूर-तरङ्गितैरपाङ्गैः ।
अवलोकय मामकिञ्चनानां
प्रथमं पात्रमकृत्रिमं दयायाः ॥ २० ॥

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं
त्रयीमयीं त्रिभुवन-मातरं रमाम् ।
गुणाधिका गुरुतर-भाग्य-भाजिनो
भवन्ति ते भुवि बुधभाविताशयाः ॥ २१ ॥

सुवर्णधारा-स्तोत्रं यच्छङ्कराचार्य-निर्मितम् ।
त्रिसन्ध्यं यः पठेन्नित्यं कुवेरसमो भवेत् ॥ २२ ॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विन्ध्येश्वरीस्तोत्रम्

निशुम्भ-शुम्भ-मर्दिनी प्रचण्ड-मुण्डखण्डनीम्।
वने रणे प्रकाशिनीं भजामि विन्ध्यवासिनीम्॥ १॥
त्रिशूल-रत्नधारिणीं धराविघात-हारिणीम्।
गृहे गृहे निवासिनीं भजामि विन्ध्यवासिनीम्॥ २॥
दरिद्र-दुःख-हारिणीं सतां विभूतिकारिणीम्।
वियोग-शोक-हारिणीं भजामि विन्ध्यवासिनीम्॥ ३॥
लसत्सुलोचलोचनं लतासदेवरप्रदम्।
कपाल-शूल-धारिणीं भजामि विन्ध्यवासिनीम्॥ ४॥
करो मुदा गदाधरो शिवां शिवप्रदायिनीम्।
वरावराननां शुभां भजामि विन्ध्यवासिनीम्॥ ५॥
ऋषीन्द्रजामिनिप्रदं त्रिधास्यरूपधारिणीम्।
जले स्थले निवासिनीं भजामि विन्ध्यवासिनीम्॥ ६॥
विशिष्ट-सृष्टि-कारिणीं विशाल-रूपधारिणीम्।
महोदरे विशालिनीं भजामि विन्ध्यवासिनीम्॥ ७॥
पुरन्दरादिसेवितां मुरादिवशखण्डनीम्।
विशुद्ध-बुद्धि-कारिणीं भजामि विन्ध्यवासिनीम्॥ ८॥

☆

मीनाक्षीपञ्चरत्नम्

उद्यद्भानुसहस्रकोटिसदृशां केयूर-हारोज्ज्वलां
बिम्बोष्ठीं स्मितदन्तपङ्क्तिरुचिरां पीताम्बरालङ्कृताम्।
विष्णु-ब्रह्म-सुरेन्द्र-सेवितपदां तत्त्वस्वरूपां शिवां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम्॥ १॥
मुक्ताहार-लसत्किरीटरुचिरां पूर्णेन्दुवक्त्रप्रभां
शिञ्जन्नूपुर-किङ्किणीमणिधरां पद्मप्रभाभासुराम्।
सर्वाभीष्टफलप्रदां गिरिसुतां वाणीरमासेवितां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम्॥ २॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उद्यद्भानुसहस्रकोटिसदृशां केयूर-हारोज्ज्वलां
बिम्बोष्ठीं स्मितदन्तपङ्क्तिरुचिरां पीताम्बरालङ्कृताम्।
विष्णु-ब्रह्म-सुरेन्द्र-सेवितपदां तत्त्वस्वरूपां शिवां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम्॥ १॥
मुक्ताहार-लसत्किरीटरुचिरां पूर्णेन्दुवक्त्रप्रभां
शिञ्जनूपुर-किङ्किणीमणिधरां पद्मप्रभाभासुराम्।
सर्वाभीष्टफलप्रदां गिरिसुतां वाणीरमासेवितां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम्॥ २॥

☆

दुर्गाष्टकम्

दुर्गे परेशि शुभदेशि परात्परेशि!
वन्द्ये महेशदयिते करुणार्णवेशि!।
स्तुत्ये स्वधे सकलतापहरे सुरेशि!
कृष्णस्तुते कुरु कृपां ललितेऽखिलेशि!॥ १॥
दिव्ये नुते श्रुतिशतैर्विमले भवेशि!
कन्दर्पदारशतसुन्दरि माधवेशि!।
मेघे गिरीशतनये नियते शिवेशि!
सत्यैन्द्रस्तुते कुरु कृपां ललितेऽखिलेशि!॥ २॥
रासेश्वरि प्रणततापहरे कुलेशि!
धर्मप्रिये भयहरे वरदाग्रगेशि!।
वाग्देवते विधिनुते कमलासनेनि!
राजेन्द्रस्तुते कुरु कृपां ललितेऽखिलेशि!॥ ३॥
पूज्ये महावृषभवाहिनि मङ्गलेशि!
पद्मे दिगम्बरि महेश्वरि काननेशि।
रम्ये धरे सकलदेवनुते गयेशि!
शशांकस्तुते कुरु कृपां ललितेऽखिलेशि!॥ ४॥
श्रद्धे सुराऽसुरनुते सकले जलेशि!
गङ्गे गिरीशदयिते गणनायकेशि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दक्षे स्मशाननिलये सुरनायकेशि !
रोहितस्तुते कुरु कृपां ललितेऽखिलेशि ॥ ५ ॥
तारे कृपार्द्रनयने मधुकैटभेशि !
विद्येश्वरेश्वरि यमे निखिलाक्षरेशि।
ऊर्जे चतुःस्तनि सनातनि मुक्तिकेशि !
ऋतध्वजस्तुते कुरु कृपां ललितेऽखिलेशि ॥ ६ ॥
मोक्षेऽस्थिरे त्रिपुरसुन्दरि पाटलेशि !
माहेश्वरि त्रिनयने प्रबले मखेशि।
तृष्णे तरङ्गिणि बले गतिदे ध्रुवेशि !
मुदितस्तुते कुरु कृपां ललितेऽखिलेशि ॥ ७ ॥
विश्वम्भरे सकलदे विदिते जयेशि !
विन्ध्यस्थिते शशिमुखि क्षणदे दयेशि !।
मातः सरोजनयने रसिके स्मरेशि !
सुनीतास्तुते कुरु कृपां ललितेऽखिलेशि ॥ ८ ॥
दुर्गाष्टकं पठति यः प्रयतः प्रभाते
सर्वार्थदं हरिहरादिनुतां वरेण्याम्।
दुर्गां सुपूज्य महितां विविधोपचारः
प्राप्नोति वाञ्छितफलं न चिरान्मनुष्यः ॥ ९ ॥

☆

दुर्गासिद्धमन्त्रस्तोत्रम्

विश्वेश्वरि ! त्वं परिपासि विश्वं
विश्वात्मिका धारयसीह विश्वम्।
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्रा ॥ १ ॥
देवि ! प्रपन्नार्ति हरे ! प्रसीद
प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि ! पाहि विश्वं
त्वमीश्वरी देवि ! चराऽचरस्य ॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्य-दुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥ ३ ॥

विद्याः समस्तास्तव देवि! भेदाः
स्त्रियः समस्ताः सकला जगत्सु।
त्वयैकया पुरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥ ४ ॥

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमाऽसि माया।
सम्मोहितं देवि! समस्तमेतत्
त्वं वै प्रसन्न भुविमुक्तिहेतुः ॥ ५ ॥

सर्वमङ्गल-माङ्गल्ये शिवे सर्वार्थसाधिके!
शरण्ये त्र्यम्बके! गौरि! नारायणि! नमोऽस्तुते ॥ ६ ॥

शरणागत-दीनार्त-परित्राण-परायणे! ।
सर्वस्यार्तिहरे देवि! नारायणि! नमोऽस्तु ते ॥ ७ ॥

☆

भगवतीस्तोत्रम्

जय भगवती देवि नमो वरदे जय पापविनाशिनि बहुफलदे।
जय शुम्भ-निशुम्भ-कपालधरे प्रणमामि तु देवि नरार्तिहरे ॥ १ ॥
जय चन्द्रदिवाकर-नेत्रधरे जय पावकभूषितवक्त्रवरे।
जय भैरवदेहनिलीनपरे जय अन्धकदैत्यविशोषकरे ॥ २ ॥
जय महिषविमर्दिनिशूलकरे जय लोकसमस्तकपापहरे।
जय देवि पितामहविष्णुनते जय भास्करशक्रशिराऽवनते ॥ ३ ॥
जय षण्मुख-सायुध-ईशनुते जय सागरगामिनि शम्भनुते।
जय दुःख-दरिद्र-विनाशकरे जय सुख समृद्धि विवृद्धिकरे ॥ ४ ॥
जय देवि समस्तशरीरधरे जय नाकविदशर्शिनि दुःखहरे।
जय व्याधिविनाशिनि मोक्षकरे जय वाञ्छितदायिनि सिद्धिकरे ॥ ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतद्व्यासकृतं स्तोत्रं यः पठेन्नियतः शुचिः ।
गृहे वा शुद्धभावेन प्रीता भगवती सदा ॥ ६ ॥

☆

भगवत्यष्टकम्

नमोऽस्तु ते सरस्वति त्रिशूल-चक्र-धारिणी
सिताम्बरावृते शुभे मृगेन्द्रपीठसंस्थिते ।
सुवर्णबन्धुराधरे सुझल्लरीशिरोरुहे
सुवर्णपद्मभूषिते नमोऽस्तु ते महेश्वरि ॥ १ ॥
पितामहादिभिर्नुते स्वकान्तिलुप्तचन्द्रभे
सरत्नमालयावृते भवाब्धिकष्टहारिणी ।
तमालहस्तमण्डिते तमाल-भाल-शोभिते
गिरामगोचरे इले नमोऽस्तु ते महेश्वरि ॥ २ ॥
स्वभक्तवत्सलेऽनघे सदापवर्गभोगदे
सुख समृद्धि कारिणी त्रिलोकशङ्करीश्वरि ।
भवानि भीम अम्बिके प्रचण्डतेजउज्ज्वले
भुजाकलापमण्डिते नमोऽस्तु ते महेश्वरि ॥ ३ ॥
प्रपन्नभीतिनाशिके प्रसूनमाल्यकन्धरे
धियस्तमौनिवारिके विशुद्धबुद्धिकारिके ।
सुरार्चिताऽङ्घ्रिपङ्कजे प्रचण्डविक्रमेऽक्षरे
विशालपद्मलोचने नमोऽस्तु ते महेश्वरि ॥ ४ ॥
हतस्त्वया स दैत्यधूम्रलोचनो यदा रणे
तदा प्रसूनवृष्टयस्त्रिविष्टपे सुरैः कृताः ।
निरीक्ष्य तत्र ते प्रभामलज्जत प्रभाकर-
स्त्वयि दयाकरे ध्रुवे नमोऽस्तु ते महेश्वरि ॥ ५ ॥
ननाद केसरी यदा चचाल मेदिनी तदा
जगाम दैत्यनायकः स्वसेनया द्रुतं भिया ।
सकोप कपदच्छदे सचन्ड-मुण्डघातिके
मृगेन्द्रनादनादिते नमोऽस्तु ते महेश्वरि ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुचन्दनार्चितालके सितोष्णवारणाधरे
सवर्करानने वरे निशुम्भ-शम्भ-मर्दिके।
प्रसीद अम्बिके अजे समस्त-दोषघातिके
शुभामतिप्रदेऽचले नमोऽस्तु ते महेश्वरि। ७॥
त्वमेव विश्वधारिणी त्वमेव विश्वकारिणी
त्वमेव मंगलकारिणी न गम्यसेजितात्मभिः।
दिवौकसां हिते रता करोषि दैत्यनाशनं
शताक्षि रक्तदन्तिके नमोऽस्तु ते महेश्वरि॥ ८॥
पठन्ति ये समाहिता इमं स्तवं सदा नराः
अनन्यभक्तिसंयुताः अहर्मुखेऽनवासरम्।
भवन्ति ते तु पण्डिताः सुपुत्र-धान्यसंयुताः
कलत्रभूतिसंयुता व्रजन्ति चाऽमृतं सुखम्॥ ९॥

☆

अन्नपूर्णाकवचम्

द्वात्रिंशद्वर्णमन्त्रोऽयं शङ्करप्रतिभाषितः।
अन्नपूर्णा महाविद्या सर्वमन्त्रोत्तमोत्तमा॥ १॥
पूर्वमुत्तरमुच्चार्य सम्पुटीकरणमुत्तमम्।
स्तोत्रमन्त्रस्य ऋषिर्ब्रह्मा छन्दो त्रिष्टुबुदाहृतः॥ २॥
देवता अन्नपूर्णा च ह्रीं बीजमम्बिका स्मृता।
स्वाहा शक्तिरिति ज्ञेयं भगवति कीलकं मतम्॥ ३॥
धर्माऽर्थ-काम-मोक्षेषु विनियोग उदाहृतः।
ॐ ह्रीं भगवति माहेश्वरि अन्नपूर्णायै स्वाहा।
सप्तार्णवनमुष्याणां जपमन्त्रः समाहितः॥ ४॥
अन्नपूर्णे हमं मन्त्रं मनुसप्तदशाक्षरम्।
सर्वसम्पत्प्रदो नित्यं सर्वविश्वकरी तथा॥ ५॥
भुवनेश्वरीति विख्याता सर्वाऽभीष्टं प्रयच्छति।
हृल्लेखेयमिति ज्ञेयमोङ्काराक्षररूपिणी॥ ६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कान्ति-पुष्टि-धना-ऽऽरोग्यं यशांसि लभते श्रियम्।
अस्मिन् मन्त्रे रतो नित्यं वशयेदखिलं जगत्॥ ७॥

☆

देव्यष्टकम्

महादेवीं महाशक्तिं भवानीं भववल्लभाम्।
भावार्ति-भञ्जनकरीं वन्दे त्वां लोकमातरम्॥ १॥

भक्तप्रियां भक्तिगम्यां भक्तानां कीर्ति-वर्धिकाम्।
भवप्रियां सतीं देवीं वन्दे त्वां भक्तवत्सलाम्॥ २॥

अन्नपूर्णां सदापूर्णां पार्वतीं पर्वपूजिताम्।
महेश्वरीं वृषारूढां वन्दे त्वां परमेश्वरीम्॥ ३॥

कालरात्रिं महारात्रिं मोहरात्रिं जनेश्वरीम्।
शिवकान्तां शम्भुशक्तिं वन्दे त्वां जननीमुमाम्॥ ४॥

जगत्कर्त्रीं जगद्धात्रीं मंगलकारिणीम्।
मुनिभिः संस्तुतां भद्रां वन्दे त्वां मोक्षदायिनीम्॥ ५॥

देवदुःखहरामम्बां सदा देवसहायकाम्।
मुनिदेवैः सदा सेव्यां वन्दे त्वां देवपूजिताम्॥ ६॥

त्रिनेत्रां शङ्करीं गौरीं भोगमोक्षप्रदां शिवाम्।
महामायां जगद्बीजां वन्दे त्वां जगदीश्वरीम्॥ ७॥

शरणागतजीवानां सर्वदुःख-विनाशिनीम्।
सुख-सम्पत्करीं नित्यां वन्दे त्वां प्रकृतिं पराम्॥ ८॥

देव्यष्टकमिदं पुण्यं योगानन्देन निर्मितम्।
यः पठेत् भक्तिभावेन लभते स परं सुखम्॥ ९॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीदेवी-वन्दना

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मागर्जगतोऽखिलस्य।
प्रचुर ऐश्वर्यवान्, प्रचण्डतम् शक्तिशाली कुरु ममदेशं
त्वमीश्वरी देवि चराचरस्य॥

☆

श्रीअम्बाजी

जय अम्बे गौरी मैया जय श्यामागौरी।
तुमको निशिदिन ध्यावत हरि ब्रह्माशिव री॥ १॥ जय अम्बे॰
माँग सिंदूर विराजत टीकों मृगमद को।
उज्ज्वलसे दोउ नैना, चंद्रबदन नीको॥ २॥ जय अम्बे॰
कनक समान कलेवर रक्ताम्बर राजै।
रक्त-पुष्प गल माला, कण्ठनपर साजै॥ ३॥ जय अम्बे॰
केहरि वाहन राजत, खड्ग खपर धारी।
सुर-नर-मुनि-जन सेवत, तिनके दुखहारी॥ ४॥ जय अम्बे॰
कानन कुण्डल शोभित, नासाग्रे मोती।
कोटिक चंद्र दिवाकर सम राजत ज्योति॥ ५॥ जय अम्बे॰
शुम्भ निशुम्भ विदारे, महिषासुर-घाती।
धूम्रविलोचन नैना निशिदिन मदमाती॥ ६॥ जय अम्बे॰
चण्ड मुण्ड संहारे, शोणितबीज हरे।
मधु कैटभ दोउ मारे, सुर भयहीन करे॥ ७॥ जय अम्बे॰
ब्रह्माणी रुद्राणी, तुम कमलारानी।
आगम-निगम-बख़ानी, तुम शिव पटरानी॥ ८॥ जय अम्बे॰
चौंसठ योगिनि गावत, नृत्य करत भैरू।
बाजत ताल मृदंगा और बाजत डमरू॥ ९॥ जय अम्बे॰
तुम ही जग की माता, तुम ही हो भरता।
भक्तन की दुख हरता, सुख सम्पति करता॥ १०॥ जय अम्बे॰

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भुजा चार अति शोभित, बर-मुद्रा धारी।
मनवाञ्छित फल पावत, सेवत नर-नारी ।। ११ ।। जय अम्बे॰
कंचन थाल विराजत, अगर कपुर बाती।
श्रीमाल केतु में राजत कोटिरतन ज्योती ।। १२ ।। जय अम्बे॰
श्री अम्बेजी की आरति जो कोई नर गावै।
कहत शिवानँद स्वामी, सुख सम्पति पावै ।। १३ ।। जय अम्बे॰

☆

श्रीदुर्गाजी

जगजननी जय ! जय !! माँ ! जगजननी जय ! जय !! ।
भयहारिणि, भवतारिणि, भवभामिनि जय जय ।। टेक ।।
(तूं) ही सत-चित सुखमय शुद्ध ब्रह्मरूपा।
सत्य सनातन सुन्दर पर - शिव सुर-भूपा ।। १ ।। जग॰
आदि अनादि अनामय अबिचल अविनाशी।
अमल अनन्त अगोचर अज आनँदराशी ।। २ ।। जग॰
अविकारी, अघहारी, अकल कलाधारी।
कर्ता विधि, भर्ता हरि, हर सँहारकारी ।। ३ ।। जग॰
(तूं) विधि, वधू, रमा, (तूं) उमा, महामाया।
मूल प्रकृति, विद्या तूं, तूं जननी जाया ।। ४ ।। जग॰
राम, कृष्ण तूं, सीता, व्रजरानी राधा।
तूं वाञ्छाकल्पद्रुम, हारिणि सब बाधा ।। ५ ।। जग॰
दश विद्या, नव दुर्गा, नाना शस्त्राकरा।
अष्टमातृका, योगिनि, नव-नव-रूप-धरा ।। ६ ।। जग॰
तूं परधामनिवासिनि, महाविलासिनि तूं।
तूं ही श्मशानविहारिणि, ताण्डव-लासिनि तूं ।। ७ ।। जग॰
सुर-मुनि-मोहिनि सौम्या तूं शोभाधारा।
विवसन विकट-सरूपा, प्रलयमयी, धारा ।। ८ ।। जग॰
तूं ही स्नेहसुधामयि, तूं अति गरलमना।
रत्नविभूषित तूं ही, तूं ही अस्थि-तना ।। ९ ।। जग॰

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मूलाधारनिवासिनि, इह-पर-सिद्धिप्रदे।
कालातीता काली, कमला तूं वरदे ॥ १० ॥ जग०

शक्ति शक्तिधर तूं ही नित्य अभेदमयी।
भेदप्रदर्शिनि वाणी विमले! वेदत्रयी ॥ ११ ॥ जग०

हम अति दीन दुखी माँ! विपत-जाल घेरे।
हैं कपूत अति कपटी, पर बालक तेरे ॥ १२ ॥ जग०

निज स्वभाववश जननी! दयादृष्टि कीजै।
करुणा कर करुणामयि! चरण-शरण दीजै ॥ १३ ॥ जग०

☆

भगवान् श्रीगणेशजी

आरति गजवदन विनायक की।
सुर-मुनि-पूजित गणनायक की ॥ टेक ॥

एकदंत शशिभाल गजानन,
विघ्नविनाशक शुभगुण कानन,
शिवसुत वन्द्यमान-चतुरानन,
दुःखविनाशक सुखदायक की ॥ सुर० ॥

ऋद्धि-सिद्धि-स्वामी समर्थ अति,
विमल बुद्धि दाता सुविमल-मति,
अघ-वन-दहन, अमल अविगत गत,
विद्या विनय-बैभव-दायक की ॥ सुर० ॥

पिङ्गलनयन, विशाल शुंडधर,
धूम्रवर्ण शुचि वज्रांकुश-कर,
लम्बोदर बाधा-विपत्ति-हर,
सुरवन्दित सब विधि लायक की ॥ सुर० ॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गणेशसहस्त्रनामस्तोत्रम्

कथं नाम्नां सहस्रं स्वं गणेश उपदिष्टवान्।
शिवायैतन्ममाचक्ष्व लोकानुग्रहतत्पर॥ १॥
देव एवं पुराराति: पुरत्रय-ज्योद्यमे।
अर्चनाद् गणेशस्य जातो विघ्नाकुल: किल॥ २॥
मनसा स विनिर्धार्य ततस्तद्विघ्नकारणम्।
महागणपतिं भक्त्या समभ्यर्च्य यथाविधि॥ ३॥
विघ्न-प्रशमनोपायमपृच्छदपराजित: ।
सन्तुष्ट: पूजया शम्भोर्महागणपति: स्वयम्॥ ४॥
सर्वविघ्नैकहरणं सर्वकामफलप्रदम्।
ततस्तस्मै स्वकं नाम्नां सहस्रमिदमब्रवीत्॥ ५॥
पञ्चवक्त्रो दशभुजो भालचद्र: शशिप्रभ:।
पुष्पमाल: सर्पभूषो मुकुटाङ्गदभूषण:॥ ६॥
अग्न्यर्क-शशिनो भाभिस्तिरस्कुर्वन् दशायुध:॥ ७॥

☆

गजाननस्तोत्रम्

नमस्ते गजवक्त्राय गजाननसुरूपिणे।
पराशरसुतायैव वत्सलासूनवे नम:॥ १॥
व्यासभ्रात्रे शुकस्यैव पितृव्याय नमो नम:।
अनादिगणनाथाय स्वानन्दावासिने नम:॥ २॥
रजसा सृष्टिकर्त्रे ते सत्वत: पालकाय वै।
तमसा सर्वसंहर्त्रे गणेशाय नमो नम:॥ ३॥
सुकृते: पुरुषस्यापि रूपिणे परमात्मने।
बोधाकाराय वै तुभ्यं केवलाय नमो नम:॥ ४॥
स्वसंवेद्याय देवाय योगाय गणणाय च।
शान्तिरूपाय तुभ्यं व नमस्ते ब्रह्मनायक!॥ ५॥
विनायकाय वीराय गजदैत्यस्य शत्रवे।
मुनिमानसनिष्ठाय मुनीनां पालकाय च॥ ६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवरक्षकरायैव विघ्नेशाय नमो नमः।
वक्रतुण्डाय धीराय चैकदन्ताय ते नमः॥ ७॥
त्वयाऽयं निहतो दैत्यो गजनामा महाबलः।
ब्रह्माण्डे मृत्युसंहीनो महाश्चर्यं कृतं विभो!॥ ८॥
हते दैत्येऽधुना कृत्स्नं जगत्सन्तोषमेष्यति।
स्वाहा-स्वधायुतं पूर्णं स्वधर्मस्थं भविष्यति॥ ९॥
एवमुक्त्वा गणाधीशं सर्वे देवर्षयस्ततः।
प्रणम्य तूष्णींभावं ते सम्प्राप्ता विगतज्वराः॥ १०॥
कर्णौ सम्पीड्य गणपचरणे शिरसो ध्वनिः।
मधुरः प्रकृतस्तैस्तु तेन तुष्टो गजाननः॥ ११॥
तानुवाच मदीया ये भक्ताः परमभाविताः।
तैश्च नित्यं प्रकर्तव्यं भवद्भिर्नमनं यथा॥ १२॥
तेभ्योऽहं परमप्रीतो दास्यामि मनसीप्सिताम्।
एतादृशं प्रियं मे च नमनं नाऽत्र संशयः॥ १३॥
एवमुक्त्वा स तान् सर्वान् सिद्धि-बुद्ध्यादि-संयुतः।
अन्तर्दधे ततो देवा मुनयः स्वस्थलं ययुः॥ १४॥

☆

श्रीगणपति-वन्दन

खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपब्यालोलगण्डस्थलम्।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम्॥

☆

भगवान् श्रीगणपतिजी

श्रीगनपति भज प्रगट पार्वती अंक विराजत अबिनासी।
ब्रह्मा-विष्णु सिवादि सकल सुर करत आरती उल्लासी॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिसूलधर को भाग्य मानिकैं सब जुरि आये कैलासी।
करत ध्यान, गंधर्वगान-रत, पुष्पन की ह्वो वर्षा-सी॥
धनि भवानि व्रत साधि लह्यो जिन पुत्र परम गोलोकासी।
अचल अनादि अखंड परात्पर भक्तेहेतु भव-परकासी॥
विद्या-बुद्धि-निधान गुनाकर बिघ्नबिनासन दुखनासी।
तुष्टि पुष्टि सुभ लाभ लक्ष्मि सँग रिद्धि सिद्धि हैं दासी॥
सब कारज जग होत सिद्ध सुभ द्वादस नाम कहे छासी।
कामधेनु चिंतामनि सुरतरु चार पदारथ देतासी॥
गज आनन सुभ सदन रदन इक सुंडि ढुंढि पुर पूजा-सी।
चार भुजा मोदक करतल सजि अंकुस धारत फरसा-सी॥
ब्याल सूत्र त्रयनेत्र भाल ससि उदरवाहन सुखरासी।
जिनके सुमिरन सेवन करते टूट जात जमकी फाँसी॥
फूल कहे धरि ध्यान निरंतर मन लगाय जो कोइ गासी।
दूर करैं भव की बाधा प्रभु मुक्ति जन्म निजपद पासी॥

☆

विष्णोः शतनामस्तोत्रम्

ॐ वासुदेवं हृषीकेशं वामनं जलशायिनम्।
जनार्दनं हरिं कृष्णं श्रीवक्षं गरुडध्वजम्॥ १॥
वराहं पुण्डरीकाक्षं नृसिंहं नरकान्तकम्।
अव्यक्तं शाश्वतं विष्णुमनन्तमजमव्ययम्॥ २॥
नारायणं गदाध्यक्षं गोविन्दं कीर्तिभाजनम्।
गोवर्धनोद्धरं देवं भूधरं भुवनेश्वरम्॥ ३॥
होत्तारं यज्ञपुरुषं यज्ञेशं यज्ञवाहकम्।
चक्रपाणिं गदापाणिं शङ्खपाणिं नरोत्तमम्॥ ४॥
वैकुण्ठं दुष्टदमनं भूगर्भं पीतवाससम्।
त्रिविक्रमम् त्रिकालज्ञं त्रिमूर्तिं नन्दिकेश्वरम्॥ ५॥
रामं रामं हयग्रीवं भीमं रौद्रं भवोद्भवम्।
श्रीपतिं श्रीधरं श्रीशं मङ्गलं मङ्गलायुधम्॥ ६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दामोदरं दमोपेतं केशवं केशिसूदनम्।
वरेण्यं वरदं विष्णुमानन्दं वसुदेवजम्॥ ७॥
हिरण्यरेतसं दीप्तं पुराणं पुरुषोत्तमम्।
सकलं निष्कलं शुद्धं निर्गुणं गुणशाश्वतम्॥ ८॥
हिरण्यतनुसङ्काशं सूर्यायुतसमप्रभम्।
मेघश्याम चतुर्बाहुं कुशलं कमलेक्षणम्॥ ९॥
ज्योतिरूपमरूपं च स्वरूपं रूपसंस्थितम्।
सर्वज्ञं सर्वरूपस्थं सर्वेशं सर्वतोमुखम्॥ १०॥
ज्ञानं कूटस्थमचलं ज्ञानन्दं परमं प्रभुम्।
योगीशं योगनिष्णातं योगिनं योगरूपिणम्॥ ११॥
ईश्वरं सर्वभूतानां वन्दे भूतमयं प्रभुम्।
इति नामशतं दिव्यं वैष्णवं खलु पापहम्॥ १२॥
व्यासेन कथितं पूर्वं सर्वपापप्रणाशनम्।
यः पठेत् प्रातरुत्थाय स भवेद् वैष्णवो नरः॥ १३॥
सर्वपापविशुद्धात्मा विष्णु सायुज्यमाप्नुयात्।
चान्द्रायणसहस्राणि कन्यादानशतानि च॥ १४॥
गवां लक्षसहस्राणि मुक्तिभागी भवेन्नरः।
अश्वमेधायुतं पुण्यं फलं प्राप्नोति मानवः॥ १५॥

☆

अच्युताष्टकम्

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम्।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे॥ १॥
अच्युतं केशवं सत्य-भा-माधवं माधवं श्रीधरं राधिकाऽऽराधितम्।
इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दनं सन्दधे॥ २॥
विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणीरागिणे जानकीजानये।
बल्लवीवल्लभायाऽर्चितायात्मने कंसविध्वंसिने वंशिने ते नमः॥ ३॥
कृष्ण गोविन्द हे राम नारायण श्रीपते वासुदेवार्जित श्रीनिधे।
अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक॥ ४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणः।
लक्ष्मणेनाऽन्वितो-वानरैः-सेवितोऽगस्त्यसम्पूजितोराघवः पातुमाम्॥ ५॥
धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः।
पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा॥ ६॥
विद्युदुद्योतवान् प्रस्फुरद्वाससं प्रावृडम्भोदवत् प्रोल्लसद्विग्रहम्।
वन्यया मालया शोभितोरःस्थलं लोहितांघ्रिद्वयं वारिजाक्षभजे॥ ७॥
कुञ्चितैः कुन्तलैर्भ्राजमानाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः।
हारकेयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे॥ ८॥
अच्युतस्याऽष्टकं यः पठेदिष्टद प्रेमतः प्रत्यहं पुरुषः सस्पृहम्।
वृत्ततः सुन्दरं कर्तृविश्वम्भरं तस्य वश्यो हरिर्जायते सत्वरम्॥ ९॥

☆

श्रीकमलापत्यष्टकम्

भुजगतल्पगतं घनसुन्दरं गरुडवाहनमम्बुजलोचनम्।
नलिनचक्रगदाकरमव्ययं भजत रे मनुजाः कमलापतिम्॥ १॥
अलिकुलासितकोमलकुन्तलं विमलपीतदुकूलमनोहरम्।
जलधिजाङ्कितवामकलेवरं भजत रे मनुजाः कमलापतिम्॥ २॥
किमु जपैश्च तपोभिरुताध्वरैरपि किमुत्तमतीर्थनिषेवणैः।
किमुत शास्त्रकदम्बविलोकनैर्भजत रे मुनजाः कमलापतिम्॥ ३॥
मनुजदेहमिमं भुवि दुर्लभं समधिगम्य सुरैरपि वाञ्छितम्।
विषयलम्पटतामपहाय वै भजत रे मनुजाः कमलापतिम्॥ ४॥
न वनिता न सुतो न सहोदरो न हि पिता जननी न च बान्धवः।
व्रजति साकमनेन जनेन वै भजत रे मनुजाः कमलापतिम्॥ ५॥
सकलमेव चलं सचराचरं जगदिदं सुतरां धनयौवनम्।
समवलोक्य विवेकदृशा द्रुतं भजत रे मनुजाः कमलापतिम्॥ ६॥
विविधरोगयुतं क्षणभङ्गुरं परवशं नवमार्गमलाकुलम्।
परिनिरीक्ष्य शरीरमिदं स्वकं भजत रे मनुजाः कमलापतिम्॥ ७॥
मुनिवरैरनिशं हृदि भावितं शिवविरिञ्चिमहेन्द्रनुतं सदा।
मरणजन्मजराभयमोचनं भजत रे मनुजाः कमलापतिम्॥ ८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हरिपदाष्टकमेतदनुत्तमं परमहंसजनेन समीरितम्।
पठति यस्तु समाहितचेतसा व्रजति विष्णुपदं स नरो ध्रुवम्॥ ९॥

☆

श्रीरमापत्यष्टकम्

जगदादिमनादिमजं पुरुषं शरदम्बरतुल्यतनुं वितनुम्।
धृतकञ्जरथाङ्गगदं विगदं प्रणमामि रमाधिपतिं तमहम्॥ १॥
कमलाननकञ्जरतं विरतं हृदि योगिजनैः कलितं ललितम्।
कुजनैः सुजनैरलभं सुलभं प्रणमामि रमाधिपतिं तमहम्॥ २॥
मुनिवृन्द-हृदिस्थपदं सुपदं निखिला-ऽध्वरभागभुजं सुभुजम्।
हृतवासवमुख्यमदं विमदं प्रणमामि रमाधिपतिं तमहम्॥ ३॥
हृतदानव-दृप्तबलं सुबलं स्वजनास्त-समस्तमलं विमलम्।
समपास्तगजेन्द्रदरं सुदरं प्रणमामि रमाधिपतिं तमहम्॥ ४॥
परिकल्पितसर्वबलं विकलं सकलागमगीतगुणं विगुणम्।
भवपाशनिराकरणं शरणं प्रणमामि रमाधिपतिं तमहम्॥ ५॥
मृति-जन्म-जराशमनं कमनं शरणागतभीतिहरं दहरम्।
परितुष्टरमाहृदयं सुदरं प्रणमामि रमाधिपतिं तमहम्॥ ६॥
सकलावनिबिम्बधरं स्वधरं परिपूरित-सर्वदिशं सुदृशम्।
गतशोकमशोककरं सुकरं प्रणमामि रमाधिपतिं तमहम्॥ ७॥
मथितार्णवराजरसं सरसं ग्रहिताऽखिललोकहृदं सुहृदम्।
प्रथितादभुतशक्तिगणं सुगणं प्रणमामि रमाधिपतिं तमहम्॥ ८॥
सुखराशिकरं मंगलकरणम् परमाष्टकमेतदनन्यमतिः।
पठतीह यू योऽनिशमेव नरो लभते खलु विष्णुपदं स परमम्॥ ९॥

☆

श्रीहरिस्तोत्रम्

जगज्जालपालं कचत्कण्ठमालं शरच्चन्द्रभालं महादैत्यकालम्।
नभोनीलकायं दुरावारमायं सुपद्मासहायं भजेऽहंभजेऽहम्॥ १॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सदाऽम्भोधिवासं लसत्पुष्पहासं जगत्सन्निवासं शतादित्यभासम्।
गदाचक्रशस्त्रं लसत्पीतवस्त्रं हसच्चारुवक्त्रं भजेऽहंभजेऽहम्॥ २॥
रमाकण्ठहारं श्रुतिव्रातसारं जलान्तर्विहारं धराभारहारम्।
चिदानन्दरूपं मनोज्ञस्वरूपं धृतानेकरूपं भजेऽहंभजेऽहम्॥ ३॥
जराजन्महीनं परानन्दपीनं समाधानलीनं सदैवानवीनम्।
जगज्जन्महेतुं सुरानीककेतुं त्रिलोकैकसेतुं भजेऽहंभजेऽहम्॥ ४॥
कृताम्नायगानं खगाधीशयानं विमुक्तेर्निदानं हरारातिमानम्।
स्वभक्तानुकूलं जगद्वृक्षमूलं निरस्तार्तशूलं भजेऽहंभजेऽहम्॥ ५॥
समस्तामरेशं द्विरेफाभकेशं जगद्बिम्बलेशं हृदाकाशदेशम्।
सदा दिव्यदेहं विमुक्ताखिलेऽहं सुवैकुण्ठगेहं भजेऽहंभजेऽहम्॥ ६॥
सुरालीबलिष्ठं त्रिलोकीवरिष्ठं गुरुणां गरिष्ठं स्वरूपैकनिष्ठम्।
सदा युद्धधीरं महावीरधीरं भवाम्भोधिधीरं भजेऽहंभजेऽहम्॥ ७॥
रमावामभागं तलानग्ननागं कृताधीनयागं गतारागरागम्।
मुनीन्द्रैः सुगीतं सुरैः गुणौघैरतीतं भजेऽहंभजेऽहम्॥ ८॥
इंद यस्तु नित्यं समाधाय चित्तं पठेदष्टकं कष्टाहारं मुरारेः।
स विष्णोर्विशोकं ध्रुवं याति लोकं जरा-जन्म-शोकं पुनर्विन्दते नो॥ ९॥

☆

श्रीहरिनामाष्टकम्

श्रीकेशवाच्युत मुकुन्द रथाङ्गपाणे गोविन्द माधव जनार्दन दानवारे।
नारायणामरपते त्रिजगन्निवास जिह्वे जपेति सततं मधुराक्षराणि॥ १॥
श्रीदेवदेव मधुसूदन शार्ङ्गपाणे दामोदरार्णवनिकेतन कैटभारे।
विश्वम्भराभरणभूषित भूमिपाल जिह्वे जपेति सततं मधुराक्षराणि॥ २॥
श्रीपद्मलोचन गदाधर पद्मनाभ पद्मेश पद्मपद पावन पद्मपाणे।
पीताम्बराम्बररुचे रुचिरावतारे जिह्वे जपति सततं मधुराक्षराणि॥ ३॥
श्रीकान्त कौस्तुभधरार्तिहराब्जपाणे विष्णो त्रिविक्रम महीधर धर्मसेतो।
वैकुण्ठवास वसुधाधिप वासुदेव जिह्वे जपेति सततं मधुराक्षराणि॥ ४॥
श्रीनारसिंह नरकान्तक कान्तमूर्ते लक्ष्मीपते गरुडवाहन शेषशायिन्।
केशिप्रणाशन सुकेश किरीटमौले जिह्वे जपेति सततं मधुराक्षराणि॥ ५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीवत्सलाञ्छन सुरर्षभ शङ्खपाणे कल्पान्तवारिधिविहार हरे मुरारे।
यज्ञेश यज्ञमय यज्ञभुगादिदेव जिह्वे जपेति सततं मधुराक्षराणि॥ ६॥
श्रीराम रावणरिपो रघुवंशकेतो सीतापते दशरथात्मज राजसिंह।
सुग्रीवमित्र मृगवेधन चापपाणे जिह्वे जपेति सततं मधुराक्षराणि॥ ७॥
श्रीकृष्ण वृष्णिवर यादव राधिकेश गोवर्धनोद्धरण कंसविनाश शौरे;
गोपाल वेणुधरं पाण्डुसुतैकबन्धो जिह्वे जपेति सततं मधुराक्षराणि॥ ८॥
इत्यष्टकं भगवतः सततं नरो यो नानाङ्कितं पठति नित्यमनन्यचेताः।
विष्णोःपर पदमुपैति पुनर्न जातु मातुः पयोधर-रसं पिबतीह सत्यम्॥ ९॥

☆

मंगलगीतम्

श्रित-कमलकुच-मण्डल धृतकुण्डल ए।
कलित-ललित-वनमाल जय जय देव हरे॥ १॥
दिनमणि-मण्डल-मण्डन भव-खण्डन ए।
मुनिजन-मानस-हंस जय जय देव हरे॥ २॥
कालिय-विषधर-गञ्जन जनरञ्जन ए।
यदुकुल-नलिन-दिनेश जय जय देव हरे॥ ३॥
मधु-मुर-नरक-विनाशन गरुडासन ए।
सुरकुल-केलि-निदान जय जय देव हरे॥ ४॥
अमल-कमल-दल-लोचन भवमोचन ए।
त्रिभुवन-भवन-निधान जय जय देव हरे॥ ५॥
जनकसुता-कृतभूषण जितदूषण ए।
समर-शमित-दशकण्ठ जय जय देव हरे॥ ६॥
अभिनव-जलधर-सुन्दर धृतमन्दर ए।
श्रीमुख-चन्द्र-चकोर जय जय देव हरे॥ ७॥
तव चरणे प्रणता वयमिति भावय ए।
कुरु कुशलं प्रणतेषु जय जय देव हरे॥ ८॥
श्रीजयदेवकवेरुदितमिदं कुरुते मुदम्।
मङ्गल-मञ्जुल गीतं जय जय देव हरे॥ ९॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वरूप भगवान्

जय जगदीश हरे ! जय जगदीश हरे।
मायातीत, महेश्वर, मन-वच-बुद्धि परे ॥ टेक ॥
आदि, अनादि, अगोचर, अविचल, अविनाशी।
अतुल, अनन्तन अनामय, अमित, शक्ति-राशी ॥ १ ॥ जय०
अमल, अकल, अज, अक्षय, अव्यय, अविकारी।
सत-चित्त-सुखमय, सुन्दर, शिव सत्ताधारी ॥ २ ॥ जय०
विधि-हरि-शंकर-गणपति-सूर्य-शक्तिरूपा ।
विश्व चराचर तुम ही, तुम्हीं विश्वभूपा ॥ ३ ॥ जय०
माता-पिता-पितामह-स्वामि-सुहृद-भर्ता ।
विश्वोत्पादक पालक रक्षक संहर्ता ॥ ४ ॥ जय०
साक्षी, शरण, सखा, प्रिय, प्रियतम, पूर्ण प्रभो।
केवल-काल कलानिधि, कालातीत, विभो ॥ ५ ॥ जय०
राम-कृष्ण, करुणामय, प्रेमामृत-सागर।
मन-मोहन मुरलीधर, नित-नव नटनागर ॥ ६ ॥ जय०
सब विधि हीन, मलिन-मति, हम अति पातकि-जन।
प्रभुपद-विमुख अभागी, कलि-कलुषित तन-मन ॥ ७ ॥ जय०
आश्रय-दान दयार्णव ! हम सबको दीजै।
पाप-ताप हर हरि ! सब, निज-जन कर लीजै ॥ ८ ॥ जय०

☆

भगवान् जगदीश्वर

ॐ जय जगदीश हरे, प्रभु ! जय जगदीश हरे ॥
भक्तजनों के संकट छिन में दूर करे ॥ ॐ ॥
जो ध्यावै फल पावै, दुख बिनसै मनका ॥ प्रभु० ॥
सुख-सम्पति घर आवै, कष्ट मिटै तनका ॥ ॐ ॥
मात-पिता तुम मेरे, शरण गहूँ किसकी ॥ प्र० ॥
तुम बिनु और न दूजा, आस करूँ जिसकी ॥ ॐ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुम पूरन परमात्मा, तुम अन्तर्यामी ॥ प्र० ॥
पारब्रह्म परमेश्वर, तुम सबके स्वामी ॥ ॐ ॥
तुम करुणा के सागर-तुम पालन-कर्ता ॥ प्र० ॥
मैं मूरख खल कामी, कृपा करो भर्ता ॥ ॐ ॥
तुम हो एक अगोचर, सबके प्राणपती ॥ प्र० ॥
किस बिधि मिलूँ दयामय ! मैं तुमको कुमती ॥ ॐ ॥
दीनबन्धु दुखहर्ता तुम ठाकुर मेरे ॥ प्र० ॥
अपने हाथ उठाओ, द्वार पड़ा तेरे ॥ ॐ ॥
विषय-विकार मिटाओ, पाप हरो देवा ॥ प्र० ॥
श्रद्धा-भक्ति बढ़ाओ, संतन की सेवा ॥ ॐ ॥

☆

श्रीविष्णु-वन्दना

सशङ्खचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षःस्थलकौस्तुभश्रियं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥
अशेषसंसारविहारहीन-
मादित्यगं पूर्णसुखाभिरामम् ।
समस्तसाक्षिं तमसः परस्ता-
न्नारायणं विष्णुमहं भजामि ॥

☆

भगवान् श्रीसत्यनारायणजी

जय लक्ष्मीरमणा, जय श्रीलक्ष्मीरमणा ।
सत्यनारायण स्वामी जन-पातक-हरणा ॥ जय० ॥ टेक ॥
रत्नजटित सिंहासन अद्भुत छवि राजै ।
नारद करत निराजन घंटा ध्वनि बाजै ॥ जय० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रकट भये कलि कारण, द्विजको दरश दियो।
बूढ़ो ब्राह्मण बनकर कञ्चन-महल कियो ॥ जय० ॥
दुर्बल भील कठारो, जिनपर कृपा करी।
चन्द्रचूड़ एक राजा, जिनकी विपति हरी ॥ जय० ॥
वैश्य मनोरथ पायो, श्रद्धा तज दीन्ही।
सो फल भोग्यो प्रभुजी फिर अस्तुति कीन्हीं ॥ जय० ॥
भाव-भक्ति के कारण छिन-छिन रूप धरयो।
श्रद्धा धारण कीनी, तिनको काज सरयो ॥ जय० ॥
ग्वाल-बाल सँग राजा वन में भक्ति करी।
मनवाञ्छित फल दीन्हों दीनदयालु हरी ॥ जय० ॥
चढ़त प्रसाद सवायो, कदलीफल मेवा।
धूप-दीप-तुलसी से राजी सत्यदेवा ॥ जय० ॥
सत्य नारायणजी की आरति जो कोइ नर गावै।
तन-मन-सुख-सम्पति मन-वाञ्छित फल पावै ॥ जय० ॥

☆

भगवान् श्रीलक्ष्मीनारायणजी

जय लक्ष्मी-विष्णो।
जय लक्ष्मीनारायण, जय लक्ष्मी-विष्णो।
जय माधव, जय श्रीपति, जय जय जय विष्णो ॥ १ ॥ जय० ॥
जय चम्पा सम-वर्णे जय नीरदकान्ते।
जय मन्द-स्मित-शोभे जय अद्भुत शान्ते ॥ २ ॥ जय० ॥
कमल वराभय-हस्ते शङ्खादिकधारिन्।
जय कमलालयवासिनि गरुडासनचारिन् ॥ ३ ॥ जय० ॥
सच्चिन्मयकरचरणे सच्चिन्मयमूर्ते।
दिव्यानन्द-विलासिनि जय सुखमयमूर्ते ॥ ४ ॥ जय० ॥
तुम त्रिभुवनकी माता, तुम सबके त्राता।
तुम लोक-त्रय-जननी, तुम सबके धाता ॥ ५ ॥ जय० ॥
तुम धन-जन-सुख-संतति-जय देनेवाली।
परमानन्द-विधाता तुम हो वनमाली ॥ ६ ॥ जय० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुम हो सुमति घरों में, तुम सबके स्वामी।
चेतन और अचेतन के अन्तर्यामी ॥ ७ ॥ जय० ॥
शरणागत हूँ, मुझपर कृपा करो माता।
जय लक्ष्मीनारायण नव-मंगल-दाता ॥ ८ ॥ जय० ॥

☆

श्रीदशावताररूप हरिवन्दना

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते छत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यंनमः ॥

☆

दशावतारस्तोत्रम्

नमोऽस्तु नारायण-मन्दिराय नमोऽस्तु हारायणकन्धराय।
नमोऽस्तु पारायण-चर्चिताय नमोऽस्तु नारायण तेऽर्चिताय ॥ १ ॥
नमोऽस्तु मत्स्याय लयाब्धिगाय नमोऽस्तु कूर्माय पयोऽब्धिगाय।
नमो वराहाय धराधराय नमो नृसिंहाय परात्पराय ॥ २ ॥
नमोऽस्तु शुक्राश्रयवामनाय नमोऽस्तु विप्रोत्सवभार्गवाय।
नमोऽस्तु सीताहितराघवाय नमोऽस्तु पार्थस्तुतयादवाय ॥ ३ ॥
नमोऽस्तु बुद्धाय विमोहकाय नमोऽस्तु ते कल्किपदोदिताय।
नमोऽस्तु पूर्णामितसद्गुणाय समस्तनाथाय हयाननाय ॥ ४ ॥
करस्थ-शङ्खोल्लासदक्षमाला प्रबोधमुद्राभयपुस्तकाय।
नमोऽस्तु वक्त्रोद्गिरदागमाय निरस्तहेयाय हयाननाय ॥ ५ ॥
रमासमाकारचतुष्टयेन क्रमाच्चतुर्दिक्षु निषेविताय।
नमोऽस्तु पार्श्वद्वयगद्विरूप-श्रियाभिषिक्ताय हयाननाय ॥ ६ ॥
किरीट-पट्टाङ्गद-हार-काञ्ची-सुरत्न-पिताम्बर-नूपुराद्यैः।
विराजिताङ्गाय नमोऽस्तु तुभ्यं सुरैः परीताय हयाननाय ॥ ७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विदोषि-कोटीन्दुनिभ-प्रभाय विशेषतो मध्वमुनिप्रियाय।
विमुक्तवन्द्याय नमोऽस्तु विष्वग् विधूतविघ्नाय हयाननाय॥ ८॥
नमोऽस्तु शिष्टेष्टद-वादिराजकताष्टकाभिष्टुतचेष्टिताय।
दशावतारैस्त्रिदशार्थदाय निशेशबिम्बस्थहयाननाय॥ ९॥

☆

सिद्धिलक्ष्मीस्तुतिः

आकारब्रह्मरूपेण ॐकारं विष्णुमव्ययम्।
सिद्धिलक्ष्मि! परालक्ष्मि! लक्ष्यलक्ष्मि! नमोऽस्तुते॥ १॥
याः श्रीः पद्मवने कदम्बशिखरे राजगृहे कुञ्जरे
श्वेते चाऽश्वयुते वृषे च युगले यज्ञे च यूपस्थिते।
शङ्खे देवकुले नरेन्द्रभवने गङ्गातटे गोकुले
या श्रीस्तिष्ठति सर्वदा मम गृहे भूयात् सदा निश्चला॥ ३॥
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरनमिता शुद्धवक्त्रोत्तरीया।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणि-गण-खचितैः स्नापिता हेमकुम्भै-
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता॥ ३॥

☆

महालक्ष्म्यष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते।
शङ्ख-चक्र-गदाहस्ते महालक्ष्मि नमोऽस्तु ते॥ १॥
नमस्ते गरुडारूढे कोलासुरभयङ्करि।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते॥ २॥
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते॥ ३॥
सिद्धि-बुद्धि-प्रदे देवि भक्ति-मुक्ति-प्रदायिनि।
मन्त्रपूते सदा देवि महालक्ष्मि नमोऽस्तु ते॥ ४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते॥ ५॥
स्थूल-सूक्ष्म-महारौद्रे महाशक्ति महोदरे।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते॥ ६॥
पद्मासनस्थिते देवि परब्रह्म-स्वरूपिणी।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥ ७॥
स्वेताम्बरधरे देवि नानालङ्कारभूषिते।
जगत्-स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥ ८॥
महालक्ष्म्यष्टकस्तोत्रं यः पठेद् भक्तिमान्नरः।
सर्वसिद्धमवाप्नोति राज्यं प्राप्नोति सर्वदा॥ ९॥
एककाले पठेन्नित्यं महापापविनाशनम्।
द्विकालं यः पठेन्नित्यं धन-धान्य-समन्वितः॥ १०॥
त्रिकालं यः पठेन्नित्यं सर्वविरोधविनाशनम्।
महालक्ष्मि भवेन्नित्यं प्रसन्ना वरदा शुभा॥ ११॥

☆

लक्ष्मीस्तोत्रम्

क्षमस्व भगवत्यम्ब क्षमाशीले परात्परे।
शुद्धसत्त्वस्वरूपे च मंगल कारिणीम॥ १॥
उपमे सर्वसाध्वीनां देवीनां देवपूजिते।
त्वया विना जगत्सर्वं मृततुल्यं च निष्फलम्॥ २॥
सर्वसम्पत्स्वरूपा त्वं सर्वेषां सर्वरूपिणी।
रामेश्वर्यधिदेवी त्वं त्वत्कलाः सर्वयोषितः॥ ३॥
कैलासे पार्वती त्वं च क्षीरोदे सिन्धुकन्यका।
स्वर्गे स्वर्गलक्ष्मीस्त्वं मर्त्यलक्ष्मीश्च भूतले॥ ४॥
वैकुण्ठे च महालक्ष्मीर्देवदेवी सरस्वती।
गंङ्गा च तुलसी त्वं च सावित्री ब्रह्मलोकतः॥ ५॥
कृष्णप्राणाधिदेवी त्वं गोलोके राधिका स्वयम्।
रासे रासेश्वरी त्वं च बृन्दावनवने वने॥ ६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृष्णप्रिया त्वं भाण्डीरे चन्द्रा चन्दनकानने।
विरजा चम्पकवने शतश्रृङ्गे च सुन्दरी॥ ७॥
पद्मावती पद्मवने मालती मालतीवने।
कुन्ददन्तो कुन्दवने सुशीला केतकीवने॥ ८॥
कदम्बमाला त्वं देवि! कदम्बकाननेऽपि च।
राजलक्ष्मी राजगेहे गृहलक्ष्मीर्गृहे गृहे॥ ९॥
इत्युक्त्वा देवताः सर्वे मुनयो मनवस्तथा।
रुरुदुर्नम्रवदनाः शुष्ककण्ठोष्ठतालुकाः॥ १०॥
इति लक्ष्मीस्तवं पुण्यं सर्वदेवैः कृतं शुभम्।
यः पठेत् प्रातरुत्थाय स वै सर्वं लभेद् ध्रुवम्॥ ११॥
अभार्यो लभते भार्या विनीतां सुसुतां सतीम्।
सुशीलां सुन्दरीं रम्यामतिसुप्रियवादिनीम्॥ १२॥
पुत्रपौत्रवतीं शुद्धां कुलजां कोमलां वराम्।
अपुत्रो लभते पुत्रं वैष्णवं चिरजी विनम्॥ १३॥
परमैश्वर्ययुक्तं च विद्यावन्तं यशस्विनम्।
भ्रष्टराज्यो लभेद्राज्यं भ्रष्टश्रीर्लभते श्रियम्॥ १४॥
हतबन्धुर्लभेद् बन्धुं धनभ्रष्टो धनं लभेत्।
कीर्तिहीनो लभेत् कीर्तिं प्रतिष्ठां च लभेद् ध्रुवम्॥ १५॥
सर्वमङ्गलदं स्तोत्रं शोक-सन्ताप-नाशनम्।
हर्षानन्दकरं शाश्वद्धर्म-मोक्ष-सुहृत्प्रदम्॥ १६॥

☆

श्रीलक्ष्मीजी

ॐ जय लक्ष्मी माता, (मैया) जय लक्ष्मी माता।
तुमको निसिदिन सेवत हर-विष्णू-धाता॥ ॐ॥
उमा, रमा, ब्रह्माणी तुम ही जग-माता।
सूर्य-चन्द्रमा ध्यावत, नारद ऋषि गाता॥ ॐ॥
दुर्गारूप निरंजनि, सुख-सम्पति-दाता।
जो कोइ तुमको ध्यावत, ऋधि-सिधि धन पाता॥ ॐ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुम पाताल निवासिनि, तुम ही शुभदाता।
कर्म-प्रभाव-प्रकाशिनि, भवनिधि की त्राता ॥ ॐ ॥
जिस घर तुम रहती, तहँ सब सद्‌गुण आता।
सब संभव हो जाता, मन नहिं घबराता ॥ ॐ ॥
तुम बिन यज्ञ न होते, वस्त्र न हो राता।
खान-पान का वैभव सब तुमसे आता ॥ ॐ ॥
शुभ-गुण-मन्दिर सुन्दर, क्षीरोदधि-जाता।
रत्न चतुर्दश तुम बिन कोई नहिं पाता ॥ ॐ ॥
महालक्ष्मीजी की आरति, जो कोइ नर गाता।
उर आनन्द समाता, पाप उतर जाता ॥ ॐ ॥

☆

श्रीलक्ष्मी-वन्दना

महालक्ष्मि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि।
हरिप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥
कुंकुमं सज्जलं दिव्यं सौभाग्यं सुखबर्धनम्
मोहिनी चं् महालक्ष्मी यशोवृद्धि करिमम्

☆

सिद्धसरस्वतीस्तोत्रंम्

सौन्दर्य-माधुर्य-सुधासमुद्र-विनिद्र-पद्मासन-सन्निविष्टाम्।
चञ्चद्-विपञ्चीकल-नादमुग्धां शुद्धां दधेऽन्तर्विसरत्सुगन्धाम् ॥ १ ॥
श्रुतिः स्मृतिस्तत्पद-पद्मगन्धि-प्रभामयं वाङ्मयमस्तपारम्।
यत्कोण-कोणाभिनिविष्टमिष्टंतामम्बिकां सर्वसितांश्रिताःस्मः ॥ २ ॥
न कान्दिशीकं रवितोऽतिवेलं तं कौशिकं संस्पृहये निशाटम्।
सावित्र-सारस्वतधामपश्यं शस्यं तपोब्राह्मणमाद्रिये तम् ॥ ३ ॥
श्रीशारदां प्रार्थित-सिद्धविद्यां श्रीशारदाम्भोज-सगोत्रनेत्राम्।
श्रीशारदाम्भोज-निवीज्यमानां श्रीशारदाङ्कानुजनिं भजामि ॥ ४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चक्राङ्ग-राजाञ्चित-पादपद्मा पद्मालयाऽभ्यर्थित-सुस्मितश्रीः।
स्मितश्रिया वर्षित-सर्वकामा वामा विधेः पूरयतां प्रियं नः॥ ५॥
बाहो रमायाः किल कौशिकोऽसौ हंसो भवत्याः प्रथितो विविक्तः।
जगद्-विधातुर्महिषि त्वमस्मान् विधेहि सभ्यान्नहि मातरिभ्यान्॥ ६॥
स्वच्छव्रतः स्वच्छचरित्रचुञ्चुः स्वच्छान्तरः स्वच्छ-समस्त वृत्तिः।
स्वच्छं भवत्याः प्रपदं प्रपन्नः स्वच्छे त्वयि ब्रह्मणि जातु यातु॥ ७॥
रवीन्दु-वाह्नि-द्युति-कोटि-दीप्तं सिंहासनं सन्तत-वाद्य-गानम्।
विदीपयन्मातृकधाम यामः कारुण्य-पूर्णामृत-वारिवाहम्॥ ८॥
शुभ्रां शुभ्र-सरोज-मुग्धवदनां शुभ्राम्बरालङ्कृतां
शुभ्राङ्गी शुभ-शुभ्रहास्यविशदां शुभ्रस्रगाशोभिनीम्।
शुभ्रोद्दाम-ललाम-धाममहिमां शुभ्रान्तरङ्गगतां
शुभ्राभां भयहारि-भाव-भरितां श्रीभारतीं भावये॥ ९॥
मुक्तालङ्कृत-कुन्तलान्तसरणिं रत्नालिहारावलिं
काञ्ची-कान्त-बलग्न-लग्नवलयां वज्राङ्गुलीयाङ्गुलिम्।
लीला-चञ्चल- लोचनाञ्चल- चलल्लोकेश-लोलालकां
कल्यामाकलयेऽतिवेलमतुलां वित्कल्पवल्लीकलाम्॥ १०॥
प्रयतो धारयेद् यस्तु सारस्वतमिमं स्तवम्।
सारस्वतं तस्य महः प्रत्यक्षमचिराद् भवेत्॥ ११॥
वाग्बीजसम्पुटं स्तोत्रं जगन्मातुः प्रसादजम्।
शिवालये जपन् मर्त्यः प्राप्नुयाद् बुद्धिवैभवम्॥ १२॥
सूर्यग्रहे प्रजपितः स्तवः सिद्धिकरः परः।
वाराणस्यां पुण्यतीर्थे सद्यो वाञ्छितदायकः॥ १३॥
पादाम्भोजे सरस्वत्याः शङ्कराचार्यभिक्षुणा।
काशीपीठाधिपतिना गुम्फिता स्रक् समर्पिता॥ १४॥

☆

सरस्वतीस्तोत्रम्

श्वेत-पद्मासना देवी श्वेत-पुष्पोप-शोभिता।
श्वेताम्बर-धरा नित्या श्वेत-गन्धानुलेपना॥ १॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वेताक्षी शुक्लवस्त्रा च श्वेत-चन्दन-चर्चिता।
वरदा सिन्धु-गन्धर्वैर्ऋषिभिः स्तूयते सदा॥ २॥
स्तोत्रेणाऽनेन तां देवीं जगद्धात्रीं सरस्वतीम्।
ये स्तुवन्ति त्रिकालेषु सर्वविद्या लभन्ति ते॥ ३॥
या देवी स्तूयते नित्यं ब्रह्मेन्द्र-सुर-किन्नरैः।
सा ममैवाऽस्तु जिह्वाग्रे पद्महस्ता सरस्वती॥ ४॥

☆

महासरस्वतीस्तुतिः

शुक्लां ब्रह्म-विचार-सार-परमामाद्यां जगद्व्यापिनीं
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिक-मालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥ १॥
या कुन्देन्दु-तुषार-हार-धवला या शुभ्रवस्त्रावृता
या वीणा-वरदण्ड मण्डितकरा या श्वेतपद्मासना।
या ब्रह्मा-ऽच्युत-शङ्कर-प्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेष-जाड्यापहा॥ २॥
वीणाधरे विपुल-मङ्गलदानशीले
भक्तार्तिनाशिनि विरञ्चिहरीशवन्द्ये।
कीर्तिप्रदेऽखिलमनोरथदे महार्हे
विद्याप्रदायिनि सरस्वति नौमि नित्यम्॥ ३॥
शारदा शारदाम्भोजवदना वदनाम्बुजे।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्॥ ४॥

☆

सरस्वत्यष्टकम्

महामते! महाप्राज्ञ! सर्वशास्त्र-विशारद।
अक्षीणकर्मबन्धस्तु पुरुषो द्विजसत्तम!॥ १॥
मरणे यज्जपेज्जाप्यं पञ्चभावमनुस्मरन्।
परम्पदमवाप्नोति तन्मे ब्रूहि महामते!॥ २॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शौनक उवाच

इदमेव महाराज! पृष्ठवांस्ते पितामहः।
भीष्मं धर्मविदां श्रेष्ठ धर्मपुत्रो युधिष्ठिरः॥ ३॥

युधिष्ठिर उवाच

पितामह! महाप्राज्ञ! सर्वशास्त्रविशारद!।
बृहस्पतिस्तुता देवी वागीशाय महात्मने!।
आत्मानं दर्शयामास सूर्यकोटि-समप्रभम्॥ ४॥

सरस्वत्युवाच

वरं वृणीष्व भगवन्! यत्ते मनसि वर्तते।

बृहस्पतिरुवाच

यदि मे वरदा देवि! दिव्यज्ञानं प्रयच्छ नः॥ ५॥

देव्युवाच

हन्त ते निर्मलं ज्ञानं कुमतिध्वंसकारकम्।
स्तोत्रेणाऽनेन ये भक्त्या मां स्तुवन्ति मनीषिणः॥ ६॥

बृहस्पतिरुवाच

लभते परमं ज्ञानं यत् सुरैरपि दुर्लभम्।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः॥ ७॥

सरस्वत्युवाच

त्रिसन्ध्यं प्रयतो नित्यं पठेदष्टकमुत्तमम्।
तस्य कण्ठे सदा वासं करिष्यामि न संशयः॥ ८॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नीलसरस्वतीस्तोत्रम्

घोररूपे महारावे सर्वशत्रुभयङ्करि।
भक्तेभ्यो वरदे देवि त्राहि मां शरणागतम्॥ १॥

ॐ सुराऽसुरार्चिते देवि सिद्धगन्धर्वसेविते।
जाडयपापहरे देवि त्राहि मां शरणागतम्॥ २॥

जटाजूटसमायुक्ते लोलजिह्वान्तकारिणि।
द्रुतबुद्धिकरे देवि त्राहि मां शरणागतम्॥ ३॥

सौम्यक्रोधधरे रूपे चण्डरूपे नमोऽस्तुते।
सृष्टिरूपे नमस्तुभ्यं त्राहि मां शरणागतम्॥ ४॥

जडानां जडतां हन्ति भक्तानां भक्तवत्सला।
मूढतां हर मे देवि त्राहि मां शरणागतम्॥ ५॥

वं ह्रूं ह्रूं कामये देवि बलिहोमप्रिये नमः।
उग्रतारे नमो नित्यं त्राहि मां शरणागतम्॥ ६॥

बुद्धिं देहि यशो देहि कवित्वं देहि देहि मे।
मूढत्वं च हरेद् देवि त्राहि मां शरणागतम्॥ ७॥

इन्द्रादि-विलसद्-द्वंद्ववन्दिते करुणामयि।
तारे ताराधिनाथास्ये त्राहि मां शरणागतम्॥ ८॥

अष्टम्यां च चतुर्दश्यां नवम्यां यः पठेन्नरः।
षण्मासैः सिद्धिमाप्नोति नाऽत्र कार्या विचारणा॥ ९॥

मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां तर्कव्यकारणादिकम्॥ १०॥

इदं स्तोत्रं पठेद्यस्तु सततं श्रद्धयाऽण्वितः।
तस्य शत्रुः क्षयं याति महाप्रज्ञा प्रजायते॥ ११॥

पीडायां वाऽपि संग्रामे जाडये दाने तथा भये।
य इदं पठति स्तोत्रं शुभं तस्य न संशयः।
इति प्रणम्य स्तुत्वा च योनिमुद्रां प्रदर्शयेत्॥ १२॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भगवान् श्रीरामचन्द्र

श्रीरामचंद्र कृपालु भजु मन हरण भव भय दारुणम्।
नवकंजलोचन, कंज-मुख, कर-कंज, पद-कंजारुणम्॥ १॥
कंदर्प अगणित अमित छवि , नवनील-नीरद-सुन्दरम्।
पटपीत मानहु तडित रुचि शुचि नौमि जनक-सुता वरम्॥ २॥
भजु दीनबंधु दिनेश दानव-दैत्यवंश-निकंदम्।
रघुनाथ आनँदकंद कौसल चंद दशरथ-नंदनम्॥ ३॥
सिर मुकुट कुंडल तिलक चारु उदार अंग विभूषणम्।
आजानुभुज शर-चाप-धर संग्राम-जित-खर-दूषणम्॥ ४॥
इति वदति तुलसीदास शंकर-शेष-मुनि-मन-रंजनम्।
मम हृदय कंज निवास करु कामादि-खल-दल गंजनम्॥ ५॥

☆

रामस्तोत्रम्

नमोऽस्तु रामाय सशक्तिकाय नीलोत्पल-श्यामल-कोमलाय।
किरीटहाराङ्गदभूषणाय सिंहासनस्थाय महाप्रभाय॥ १॥
त्वमादिमध्यान्तविहीन एकः सृजस्यवस्यत्सि च लोकजातम्।
स्वमायया तेन न लिप्यसे त्वं यत्स्वे सुखेऽजस्त्ररतोऽनवद्यः॥ २॥
लीलां विधत्से गुणसंवृतस्त्वं प्रपन्नभक्तानुविधानहेतोः।
नानावतारैः सुरमानुषाद्यैः प्रतीयसे ज्ञानिभिरेव नित्यम्॥ ३॥
स्वांशेन लोकं सकलं विधाय तं बिभर्षि च त्वं त्वदधः फणीश्वर।
उपर्यधो भान्वनिलोडुपौषधी-प्रवर्षरूपोऽवसि नैकधा जगत्॥ ४॥
त्वमिह देहभृतांशिखिरूपः रूपः पचसि भक्तमशेषमजस्त्रम्।
पवनपञ्चकरूपसहायो जगदखण्डमनेन बिभर्षि॥ ५॥
चन्द्रसूर्यशिखिमध्यगतं यत्तेज ईश चिदशेषतनूनाम्।
प्राभवत्तनुभृतामिह धैर्यं शौर्यमायुरखिलं तव सत्त्वम्॥ ६॥
त्वं विरिञ्चि-शिव-विष्णुविभेदात् कालकर्मशशि-सूर्यविभागात्।
वादिनां पृथगिवेश विभासि ब्रह्म निश्चितमनन्यदिहैकम्॥ ७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कल्कादिरूपेण यथा त्वमेकः श्रुतौ पुराणेषु च लोकसिद्धः।
तथैव सर्वं सदसद्विभागस्त्वमेव नाऽन्यद् भवतो विभाति॥ ८॥
यद्यत्समुत्पन्नमनन्तसृष्टावुत्पत्स्यते यद्यभवच्च यच्च।
न दृश्यते स्थावरजङ्गमादौ त्वया विनाऽतः परतः परस्त्वम्॥ ९॥
तत्त्वं न जानन्ति परात्मनस्ते जनाः समस्तास्तव माययाऽतः।
त्वद्भक्तसेवामलमानसानां विभाति तत्त्वं परमेकमेशम्॥ १०॥
ब्रह्मादयस्ते न विदुः स्वरूपं चिदात्मसत्त्वं बहिरर्थभावः।
ततो बुधस्त्वामिदमेव रूपं भक्त्या भजन्मुक्तिमुपेत्य दुःखः॥ ११॥
अहं भवन्नामगुणैः कृतार्थो वसामि काश्यामनिशं भवान्या।
मुमूर्षमाणस्य विमुक्तयेऽहं दिशामि मन्त्रं तव रामनाम॥ १२॥
इमं स्तवं नित्यमनन्यभक्त्या श्रृण्वन्ति गायन्ति लिखन्ति ये वै।
ते सर्वसौख्यं परमं च लब्ध्वा भवत्पदं यान्तु भवत्प्रसादात्॥ १३॥

☆

रामस्तोत्रम्

भजेऽहं सदा राममिन्दीवराभं भवारण्यदावानलाभाभिधानम्।
भवानीहृदा भावितानन्दरूपं भवाभावहेतुं भवादिप्रपन्नम्॥ १॥
सुरानीक-दुःखौघ-नाशैकहेतुं नराकारदेहं निराकारमीड्यम्।
परेशं परानन्दरूपं वरेण्यं हरिं राममीशं भजे भारनाशम्॥ २॥
प्रपन्नाखिलानन्ददोहं प्रपन्नं प्रपन्नार्ति-निःशेषनाशाभिधानम्।
तपोयोग-योगीश-भावानुभाव्यं कपीशादिमित्रं भजे राममित्रम्॥ ३॥
सदा भोगभाजां सुदूरे विभान्तं सदा योगभाजामदूरे विभान्तम्।
चिदानन्दकन्दं सदा राघवेशं विदेहात्मजानन्दरूपं प्रपद्ये॥ ४॥
महायोगमायाविशेषानुयुक्तो विभासीशलीलानराकारवृत्तिः।
त्वदानन्दलीलाकथापूर्णकर्णाः सदानन्दरूपा भवन्तीह लोके॥ ५॥
अहं मानपानाभिमत्तप्रमत्तो न वेदाखिलेशाभिमानाभिमानः।
इदानीं भवत्पाद-पद्मप्रसादात् त्रिलोकाधिपत्याभिमाना विनष्टः॥ ६॥
स्फुरद्रत्न-केयूर-हाराभिरामं धराभारभूतासुरानीकदावम्।
शरच्चन्द्रवक्त्रं लसत्पद्मनेत्रं दुरावारपारं भजे राघवेशम्॥ ७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुराधीश-नीलाभ्र-नीलाङ्गकान्तिं विराधादि-रक्षावधाल्लोकशान्तिम्।
किरीटादिशोभं पुरारातिलोभं भजे रामचन्द्रं रघूणामधीशम्॥ ८॥
लसच्चन्द्रकोटिप्रकाशादिपीठे समासीनमेकं समाधाय सीताम्।
स्फुरद्धेमवर्णां तडित्पुञ्जभासां भजे रामचन्द्रं निवृत्तार्तितन्द्रम्॥ ९॥

☆

रामाष्टकम्

कृतार्तदेववन्दनं दिनेशवंशनन्दनम्।
सुशोभिभालचन्दनं नमामि राममीश्वरम्॥ १॥
मुनीन्द्र-यज्ञकारकं शिलाविपत्तिहारकम्।
महाधनुर्विदारकं नमामि राममीश्वरम्॥ २॥
स्वतातवाक्यकारिणं तपोवने विहारिणम्।
करेषु चापधारिणं नमामि राममीश्वरम्॥ ३॥
कुरङ्गमुक्तसायकं जटायुमोक्षदायकम्।
प्रविद्धकीशनायकं नमामि राममीश्वरम्॥ ४॥
प्लवङ्गसङ्घसम्मतिं निबद्धनिम्नगापतिम्।
दशास्यवंशसंक्षतिं नमामि राममीश्वरम्॥ ५॥
विदीनदेवहर्षणं कपीप्सितार्थवर्षणम्।
स्वबन्धुशोककर्षणं नमामि राममीश्वरम्॥ ६॥
गतारिराज्यरक्षणं प्रजाजनार्तिभक्षणम्।
कृतास्तमोहलक्ष्मणं नमामि राममीश्वरम्॥ ७॥
हृदाखिलाचलाभर स्वधामनीतनागरम्।
जगत्तमोदिवाकरं नमामि राममीश्वरम्॥ ८॥
इदं समाहितात्मना नरो रघूत्तमाष्टकम्।
पठेन्निरन्तं भयं भवोद्भवं न विन्दते॥ ९॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रामचन्द्रस्तुतिः

नमामि भक्तवत्सलं कृपालुशीलकोमलं
भजामि ते पदाम्बुजमकामिनां स्वधामदम्।
निकाम-श्याम-सुन्दरं भवाम्बुनाथमन्दरं
प्रफुल्लकञ्जलोचनं मदादिदोषमोचनम्।। १।।
प्रलम्बबाहुविक्रमं प्रभोऽप्रमेयवैभवं
निषङ्गचापसायकं धरं त्रिलोकनायकम्।
दिनेशवंशमण्डनं महेशचापखण्डनं
मुनीन्द्रसन्तरञ्जनं सुरारिवृन्दभञ्जनम्।। २।।
मनोजवैरिवन्दितं-अजादि - देवसेवितं
विशुद्धबोधविग्रहं समस्तदूषणापहम्।
नमामि इन्दिरापतिं सुखांकरं सतां गतिं
भजे सशक्तिसानुजं शचीपतिप्रियानुजम्।। ३।।
त्वदङ्घ्रिमूल ये नरा भजन्ति हीनमत्सराः
पतन्ति नो भवार्णवे वितर्कवीचिसङ्कुले।
विविक्तवासिनः सदा भजन्ति मुक्तये मुदा
निरस्य इद्रियादिकं प्रयान्ति ते गतिं स्वकाम्।। ४।।
त्वमेकमद्भुतं प्रभुं निरीहमीश्वरं विभुं
जगद्गुरुं च शाश्वतं तुरीयमेव केवलम्।
भजामि भाववल्लभं कुयोगिनां सुदुर्लभं
स्वभक्तकल्पपादपं समस्तसेव्यमन्वहम्।। ५।।
अनूपरूपभूपतिं नतोऽहमुर्विजापतिं
प्रसीद मे नमामि ते पदाब्जभक्ति देहि मे।
पठन्ति ये स्तवमिदं नरादरेण ते पदं
व्रजन्ति नाऽत्र संशयस्त्वदीयभावसंयुतम्।। ६।।

☆

भगवान् श्रीराम

हरति सब आरती आरती राम की।
दहन दुख-दोष, निरमूलिनी काम की।। १।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुरभ सौरस धूप दीप वर मालिका।
उड़त अघ-विहँग सुनि ताल कर तालिका ॥ २ ॥
भक्त-हृदि-भवन अज्ञान-तम-हारिनी।
विमल विग्यानमय तेज बिस्तारिनी ॥ ३ ॥
मोह-मद-कोह-कलि-कंज-हिम-जामिनी।
मुक्तिकी दूतिका, देह-दुति दामिनी ॥ ४ ॥
प्रणत-जन-कुमुद-वन-इंदु-कर जालिका।
तुलसि अभिमान महिषेस बहु कालिका ॥ ५ ॥

☆

श्रीराम-वन्दना

श्रीरामचन्द्र रघुपुङ्गव राजवर्य
राजेन्द्र राम रघुनायक राघवेश।
राजाधिराज रघुनन्दन रामचन्द्र
दासोऽहमद्य भवतः शरणागतोऽस्मि ॥

☆

श्रीजानकी-वन्दन

उद्भवस्थितिसंहारकारिणीं क्लेशहारिणीम्।
सर्वश्रेयस्करीं सीतां नतोऽहंरामवल्लभाम् ॥

☆

कृष्णस्तोत्रम्

वन्दे नवघनश्यामं पीतकौशेयवाससम्।
सानन्दं-सुन्दरं शुद्धं श्रीकृष्णं श्रीकृष्णं प्रकृतेः परम् ॥ १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राधेशं राधिकाप्राणवल्लभं बल्लवीसुतम्।
राधासेवितपादाब्जं राधावक्षःस्थलस्थितम्॥ २॥
राधानुगं राधिकेष्टं राधापहृतमानसम्।
राधाधारं भवाधारं सर्वाधारं नमामि तम्॥ ३॥
राधाहृत्पद्ममध्ये च वसन्तं सन्ततं शुभम्।
राधासहचर शश्वद्राधाज्ञापरिपालकम्॥ ४॥
ध्यायन्ते योगिनो योगान् सिद्धाः सिद्धेश्वराश्च यम्।
त् ध्यायेत् सततं शुद्धं भगवन्तं सनातनम्॥ ५॥
सेवन्ते सततं सन्तो ब्रह्मेशशेषसंज्ञकाः।
सेवन्ते निर्गुणं ब्रह्म भगवन्तं सनातनम्॥ ६॥
निर्लिप्तं च निरीहं च परमात्मानमीश्वरम्।
नित्यं सत्यं च परम भगवन्तं सनातनम्॥ ७॥
यं सृष्टेरादिभूतं च सर्वबीज परात्परम्।
योगिनस्तं प्रपद्यन्ते भगवन्तं सनातनम्॥ ८॥
बीजं नानावताराणां सर्वकारणकारणम्।
वेदावेद्यं वेदबीजं वेदकारणकारणम्॥ ९॥
योगिनस्तं प्रपद्यन्ते भगवन्तं सनातनम्।
इत्येवमुक्त्वा गर्न्धवः पपात धरणीतले॥ १०॥
ननाम दण्डवद्भूमौ देवदेवं परात्परम्।
इति तेन कृतं स्तोत्रं यः पठेत् प्रयतः शुचिः॥ ११॥
इहैव जीवन्मुक्तश्च परं याति परां गतिम्।
हरिभक्तिं हरेर्दास्यं गोलोके च निरामयः॥ १२॥
पार्षदप्रवरत्वं च लभते नाऽत्र संशयः॥ १३॥

☆

कृष्णाष्टकम्

भजे व्रजैकमण्डनं समस्तपापखण्डनं
स्वभक्त-चितरंजनं सदैव नन्दनन्दनम्।
सुपिच्छ-गुच्छ-मस्तकं सुनाद-वेणुहस्तकं
ह्यनङ्ग-रङ्गसागरं नामामि कृष्णनागरम्॥ १॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनोजगर्वमोचनं विशाल-लोल-लोचनं
विधूतगोपशोचनं नमामि पद्मलोचनम्।
करारविन्दभूधरं स्मितावलोकसुन्दरं
महेन्द्रमानदारणं नमामि कृष्णवारणम्॥ २ ॥
कदम्बसूनुकुण्डलं सुचारु-गण्ड-मण्डलं
व्रजाङ्गनैकवल्लभं नमामि कृष्णदुर्लभम्।
यशोदया समोदया समोपया सनन्दया
युतं सुखैकदायकं नमामि गोपनायकम्॥ ३ ॥
सदैव पादपङ्कजं मदीयमानसे निजं
दधानमुत्तमालकं नमामि नन्दबालकम्।
समस्त-दोष-शोषणं समस्तलोकपोषणं
समस्तगोपमानसं नमामि कृष्णलालसम्॥ ४ ॥
भुवो भरावतारकं भवाब्धिकर्णधारकं
यशोमतीकिशोरकं नमामि दुग्धचोरकम्।
दृगन्तकान्तभङ्गिनं सदासदालसङ्गिनं
दिने दिने नवं नवं नमामि नन्दसम्भवम्॥ ५ ॥
गुणाकरं सुखाकरं कृपाकरं कृपावरं
सुरद्विषन्निकन्दनं नामामि गोपनन्दनम्।
नवीनगोपनागरं नवीनकेलिलम्पटं
नमामि मेघसुन्दरं तडित्प्रभालसत्पटम्॥ ६ ॥
समस्तगोपनन्दनं हृदम्बुजैकमोहनं
नमामि कुञ्जमध्यगं प्रसन्नभानुशोभनम्।
निकामकामदायकं दृगन्तचारुसायकं
रसालवेणुगायकं नमामि कुञ्जनायकम्॥ ७ ॥
विदग्ध-गोपिकामनो-मनोज्ञ-तल्पशायिनं
नमामि कुञ्जकानने प्रवृद्ध-वह्निय-पायिनम्।
यदा तदा यथा तथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम्।
प्रमाणिकाष्टकद्वयं जपत्यधीत्य यः पुमान्
भवेत् सनन्द-नन्दने भवे भवे सुभक्तिमान्॥ ८ ॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृष्णाष्टकम्

चतुर्मुखादि संस्तुतं समस्तसात्वतानुतम्।
हलायुधादि-संयुतं नमामि राधिकाधिपम्॥ १॥
बकादि-दैत्यकालकं स-गोप-गोपिपालकम्।
मनोहरासितालकं नमामि राधिकाधिपम्॥ २॥
सुरेन्द्रगर्वगञ्जनं विरिञ्चि-मोह-भञ्जनम्।
व्रजाङ्गनानुरञ्जनं नमामि राधिकाधिपम्॥ ३॥
मयूरपिच्छमण्डनं गजेन्द्र-दन्त-खण्डनम्।
नृशंसकंशदण्डनं नमामि राधिकाधिपम्॥ ४॥
प्रदत्तविप्रदारकं सुदामधामकारकम्।
सुरद्रुमापहारकं नमामि राधिकाधिपम्॥ ५॥
धनञ्जयाजयावहं महाचमूक्षयावहम्।
पितामहव्यथापहं नमामि राधिकाधिपम्॥ ६॥
मुनीन्द्रशापकारणं यदुप्रजापहारणम्।
धराभरावतारणं नमामि राधिकाधिपम्॥ ७॥
सुवृक्षमूलशायिनं मृगारिमोक्षदायिनम्।
स्वकीकयधाममायिनं नमामि राधिकाधिपम्॥ ८॥
इदं समाहितो हितं वराष्टकं सदा मुदा।
जपञ्जनो जनुर्जरादितो द्रुतं प्रमुंच्यते॥ ९॥

☆

भगवान् श्रीगिरिधारी

जय जय गिरिधारी प्रभु, जय जय गिरिधारी।
दानव-दल-बलहारी, गो-द्विज-हितकारी॥ जय०॥
जय गोविन्द दयानिधि, गोवर्धन-धारी।
वंशीधर बनवारी, ब्रज-जन-प्रियकारी॥ जय०॥
गणिका-गीध-अजामिल - गजपति-भयहारी।
आरत-आरति-हारी, जग-मंगल-कारी॥ जय०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोपालक, गोपेश्वर, द्रौपदि-दुखदारी।
शबर-सुता-सुखकारी, गौतम-तिय तारी॥ जय०॥
जन-प्रह्लाद-प्रमोदक, नरहरि-तनु-धारी।
जन-मन-रञ्जनकारी, दिति-सुत-संहारी॥ जय०॥
टिट्टिभ-सुत-संरक्षक, रक्षक मंझारी।
पाण्डु-सुवन-शुभकारी कौरव-मद-हारी॥ जय०॥
मन्मथ-मन्मथ मोहन, मुरली-रव-कारी।
वृन्दाविपिन-विहारी यमुना-तट-चारी॥ जय०॥
अघ-बक-बकी-उधारक, तृणावर्त-तारी।
विधि-सुरपति-मदहारी, कंस-मुक्तिकारी॥ जय०॥
शेष, महेश, सरस्वति गुन गावत हारी।
कल कीरति-बिस्तारी, भक्त-भीति-हारी॥ जय०॥
फूल चन्द शरणागत, अति अघ, अघहारी।
पद-रज पावनकारी चाहत चितहारी॥ जय०॥

☆

भगवान् श्रीगोपालजी

वन्दे गोपालं वन्दे गोपालम्।
भृगमदशोभितभालंकरुणाकल्लोलम् जय देव, जय देव॥ १॥
निर्गुणसगुणाकारं संहृतभूभारम्।
मुरहरनन्दकुमारं मुनिजनसुखकारम्॥ २॥
वृन्दावनसंचारं कौस्तुभमणिहारम्।
करुणापारावारं गोवर्द्धनधारम्॥ ३॥
कुञ्चितकुन्तलनीलं शरदिन्दुभवदनम्।
मणिगणमण्डितकुण्डलशोभितश्रुतियुगलम्॥ ४॥
विकसितपङ्कजनयनं विकसितभ्रयुगलम्।
बिम्बाधरमतिसुन्दरनासामणिलोलम्॥ ५॥
कम्बुग्रीवं कौस्तुभमणिकण्ठाभरणम्।
श्रीवत्साङ्कितदेहं लम्बितवनमालम्॥ ६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूषितभुजवरयुगलं करतलधृतवेणुम्।
त्रिवलीशोभितमध्यं करतधृतनवनीतम्॥ ७॥
मुरलीवादनलीलासप्तस्वरगीतम्।
जलचरवनचरखेचररञ्जनसंगीतम् ॥ ८॥
स्तम्भितयमुनातोयं परमाद्भुतचरितम्।
गोपीचित्तविनोदनकारं श्रीकान्तम्॥ ९॥
रासक्रीडामण्डलवेष्टितव्रजललनम्।
मध्ये ताण्डवनृत्यत्कोमलपदयुगलम्॥ १०॥
कुसुमाकारविरञ्जितमन्दिस्मितवदनम्।
कालियफणिवरदलनं यक्षेश्वरहननम्॥ ११॥
किङ्किणिमण्डितमध्यं पीताम्बरवसनम्।
मञ्जुलनूपुरशिञ्जितविलसत्पदयुगलम् ॥ १२॥
गोगोपीपरिवेष्टितयमुनातटसंस्थम्।
व्यासाभयदं सुखदं भुवनत्रयपालम्॥ जय देव०॥ १३॥

☆

भगवान् श्यामसुन्दर

आरति कीजै स्यामसुंदर की। नंदकुमार राधिकावर की॥
भक्ति दीप कर प्रेम सुबाती। सत संगति कर अुन दिन राती॥
आरति व्रजजुवती मन भावै। स्यामलीला हितहरिबंस गावै॥

☆

श्रीराधिका-वन्दन

व्रजराजकुमार वल्लभा कुलसीमन्तमणि प्रसीद मे।
परिवारगणस्य ते यथा पदवी मे न दवीयसी भवेत्॥

☆

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हनूमत्कवचम्

ध्यायेद् बाल-दिवाकर-द्युतिनिभं देवारि-दर्पापहं
देवेन्द्र-प्रमुख-प्रशस्त-यशसं देदीप्यमानं रुचा।
सुग्रीवादि-समस्त-वानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुण-लोचनं पवनजं पीताम्बरालङ्कृतम्॥ १॥

हनुमान् पूर्वतः पातु दक्षिणे पवनात्मज।
